यावच्चन्द्रश्च सूर्यश्च तावदत्र स्थिरो भव॥
इति गोपुरं प्रार्थ्य अधिवासयेत्।

ततः चुरस्त्रो गाः गायत्र्या दुग्ध्वा, तत्क्षीरे गायत्रया चरुं श्रपयित्वा

श्रीविश्वकर्मा प्रीयतां इति वदेत्।

अथ यजमानो बहिर्निर्गतय देवालयभिमुखो भूत्वा देशकालौ संकीर्त्य अनेन शिलेष्टकादावादि निर्मितं

जलभीजगती प्राकारगोपुरदेवतासहित देवालयाधि
वासनेन तत्तद्देवतासमेत विश्वेश्वर स्वरूपश्री
विश्वकर्मा प्रीयतां इति कुशाक्षतयुतं जलं क्षिप्त्वा
प्रदक्षिणनमस्कारं कुर्यात्॥

This is followed by the purification of the sanctum. The priests, the sculptor and the master of ceremonies enter into the sanctum and determine ritualistically the exact spot on which the icon is to be installed. This spot is then sprinkled with panca-gavya (five products of the cow: milk, urine, cowdung, clarified butter and curds) and cleaned with water in which thirty-two herbs have been mixed. With the help of the instruments, the midmost point of the sanctum is ascertained (prāchī-sād-hanā and gṛha-madhya-deśa-sādhanā). Then square pit is dug around this spot, pañca-gavya is sprinkled over it, and nine precious stones a hundred gold coins and five metals are put in this pit; the pit is then filled with mud.

The foundation slab (kūrma-śilā, pavitra-śilā, or brah-ma-ślā) is placed on this pit, reciting the appropriate hymn ('śilā-bhūmir aśma pāṁsuh'). The midmost area of this slab is then ascertained, and the chief priest's right hand with all its fingers is placed on it to the accompaniment of this prayer:

त्वमेव परमा शक्तिस्त्वमेवासनधारिका।
ब्रह्मासनमयी देवि स्थातव्यमिह सर्वदा॥

The slab is now ready for the "installation of the icon on it. The icon is taken in a procession round the

temple to the eastern gateway; the temple area is then sprinkled with water (in which flowers are placed) in pradakṣina order. The icon is brought into the sanctum and placed on a throne. By the help of vibhāga-yantra and sūtra, prāchī-sādhanā is undertaken, and the exact spot on which the icon is to be installed is determined. The icon is taken to the front of the slab, and several precious stones, nine kinds of metal and other articles of value, including a golden plate on which the yantra of the main deity is inscribed, are placed in the central opening in the slab. There are mantras to be recited in each of the sequences.

The opening of the foundational slab is then closed with the ingredients of the aṣṭa-bandha, liquified in fire. The eight articles are enumerated thus:

ततोऽष्टबन्धनार्थानि द्रव्याण्यादाय शास्त्रवित्।
शंखचूर्णं गुलं चैव त्रिफलं शर्करान्वितम्॥
लाक्षाकार्पाससंयुक्तं कृष्णगुग्गुलमेव च।
माहिषं नवनीतं च एतदेवाष्टबन्धनम्॥

When all eight articles are not available, provision is made for 'pañca-bandhana' (five ingredients), or 'tri-bandhana' (three). Anything less than this will not render the fixture firm or secure:

माहिषं नवनीतं च लाक्षाशर्करसंयुतम्।
कार्पासं गुग्गुलं चैव पञ्चबन्धनमुच्यते॥
शर्करं गुग्गुलं चैव नवनीतं त्रिबन्धनम्।
त्रिबन्धनं तु कर्तव्यं सर्वत्र सुदृढं भवेत्॥

The precise method of preparing the aṣta-bandha and closing the opening of the foundational slab is given thus in *Bhrgu-samhitā:*

यथालाभं समाहृत्य चूर्णीकृत्य प्रमाणतः।
वस्त्रेणोद्घाटनं कृत्वा उपदेशेन मात्रया॥
नवनीतेन संयोज्य निक्षिप्योलूखले ततः।
मुसलं च रोहिणीं च तच्चुर्णेषु समर्चयेत्॥
शूर्पे वसुं समभ्यर्च्य चक्रमन्त्रेण घातयेत्।
आचार्यस्त्रिप्रकारं च ब्राह्मणैरवघातयेत्।
ब्रह्मपीठस्य रन्ध्रे तु बन्धयेदष्टबन्धनम्॥

The ritual of aṣta-bandhana is meant to provide fixity for the image to be installed, so that all worship sequences may conveninetiy be carried out ('bimbasya sthirīkaraṇa-dvārā pūjā-kainkarya-siddhyartham'). The image will be set up on a pedestal (piṇḍikā) which is placed over the aṣṭa-bandhana; the installation of the pedestal is itself a ritual sequence, as it is associated with vāstu-pratiṣṭhā, involving elaborate worship and the following nyāsa:

ॐ घं नमः (हृदये नमः)
ॐ फं नमः (शिरसि स्वाहा)
ॐ भं नमः (शिखायां वषट्)
ॐ घं नमः (कवचाय हुं)
ॐ लं नमः (नेत्रयाय वौषट्)
ॐ क्षं नमः (अस्त्राय फट्)

The sanctum will now have three tiers of stone-slabs beneath the icon; at the lowest level will be kūrma-śīlā,

above it brahma-śilā, and at the top-most level piṇḍikā (pedestal). The piṇḍikā is cleaned with a cloth and the icon to be installed (which till then would be in śayyādhivāsa, already explained) would be brought near it, with the mantra 'uttiṣṭha brahmaṇaspate'. The icon is solemnly placed on the pedestal and worshipped with details like the presentation of 'madhu-parka'. On the previously determined moment (muhūrta), the installation ceremony is gone through, reciting the mantra: "Om pratitiṣṭha paramesvara" and the 'devatā-sūkta': The brāhmaṇa-mantra is as follows:

गृहा वै प्रतिष्ठासूक्तं तत्प्रतिष्ठिततमया वाचाशस्तव्यं तस्माद्यद्यपि दूर इव पशून् लभते गृहानेवैना जिगमिषति गृहा हि पशूनां प्रतिष्ठा प्रतिष्ठा॥

The culmination of the entire sequence is marked by fixing the icon to the pedestal (pīṭha-bandhana). Experts attend to the proper level of the icon, the most appropriate orientation, the field of vision, and so on by techniques and instruments available to them ('samyag-dṛṣṭi sama-kona sthāna-māna sama-pramāṇādīn yantrādibhih parikṣya').

The installation is done at the proper moment, determined prioriy as most auspicious. There is a prescription that the icon must first be taken to the western side of the pedestal and then placed on the pedestal. While the icon is being placed on the pedestal, Vedic recitations, instrumental music and ringing of the bell are required to be going on.

Then the icon is fixed to the pedestal (pīṭha-bandhana). Food-offerings (bali) of eight kinds to the spirits of the eight directions are offered lights are lit and the light of camphor is ceremoniously waved before the icon (nīrājana).

The master of ceremonies now offers a prayer to the deity to dwell in the icon for all time for the sake of conferring benefits on mankind:

सर्वदेवमय श्रीमन् त्रैलोक्याह्लादकारक।
त्वां प्रीतष्ठापयाम्यत्र मन्दिरे सुरमन्दिरे॥
लोकानुग्रहहेत्वर्थं स्थिरो भव सुखाय नः।
सान्निध्यं तु सदा देव प्रत्यक्षं परिकल्पया॥
यावच्चन्द्रश्च सूर्यश्च यावदेषा वसुन्धरा।
तावत्त्वं देवदेवेश मन्दिरेस्मिन् स्थिरो भव॥
पुत्रानायुः श्रियं धान्यं धनसम्पदारोगताः।
अभ्यं सर्वभूतेभ्यो यजमानाय सर्वदा॥
विजयं भूपतेः सर्वलोकानां सुखमेव च।
सुभिक्षं क्षेममारोम्यं कुरु देव नमो नमः॥

It is more usual, as mentioned earlier, for the rite of netronmīlana (formal opening of the icon's eyes) to take place after the fixing of the icon to the pedestal, although some texts prescribe this rite to be gone through immediately prior to the 'śayyādhivāsa' sequence. The officiating priest mixes honey and clarified butter in unequal proportions in a golden bowl, stands on the right side of the icon and draws the pupils and iris of the eyes of the icon with a golden stylus (śalākā), reciting the mantra:

ॐ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः।
आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा
जगतस्तस्थुषश्च॥
तच्चक्षुर्देवहितं शुक्रमुच्चरत्।
पश्येम शरदःशतम्।जीवेम शारदः शतम्॥
तेजोऽसि शुक्रमसि अमृतमसि नामधामासि प्रियं
देवाना
मानाधृष्टं देवयजनमसि॥

During the rite, it is required that the sanctum must be screened off from the crowds of devotees. A curtain of white cloth is drawn across the doorway of the sanctum. The priest draws the details of the right eye of the icon first, and then those of the left eye. Then the two eyes are anointed with paste of honey, clarified butter and sugar, reciting this mantra:

अत्राते रूपमुत्तमंमपश्यं जिगीषमाणा मिष आपदे गोः।
यदा ते मर्तो अनुभोगमानडादिद्ग्रसिष्ठ ओषधीरजीगः॥
रूपं रूपं मघवा बोभवीति मायाः कृण्वानस्तनुव
परिस्वां।
त्रियद्दिवः परि मुहूर्तमागात् स्वैर्मन्त्रैरनृतुपा ऋतावा॥

Then the waving of the light before the icon (nīrājanā) is done before the screen is drawn aside, allowing the devotees to have a look at the icon that is newly installed. This is followed by tattva-nyāsa (ritual placement of the fundamental elements and organs on the different limbs of the icon), kalā-avahanā (invoking the soul or jīva-kalā and other aspects of divinity and

branches of learning in the heart of the icon), prāṇa-pratiṣṭhā (infusion of vitality into the icon) and homa (fire-ritual)

There is a custom of presenting before the newly installed deity a mirror (for eliminating the evil eye (dṛṣṭi-doṣa-paṅhārātham ca puratah darpaṇam'), a large pile of grains (dhānya-rāśi), a decorated water-pot filled with water, five sprouts and fruits placed in it, and fresh cloth covering it (kuṁbha), a pile of food-offerings made of rice (balyanna-rāśi), sixteen lamps fed by clarified butter (ghṛta-varti-dīpān ṣoḍaśa-sankhyākān), five pumpkins (pañca-kūṣmāṇḍān), and five fruits (pañca-phalāni); a cow with its calf is also shown to the icon. A pumpkin is broken in front of the deity. It is only after all this is done, that the devotee is allowed to have a look at the deity (nirīkṣaṇa), when the mantra "aghora-cakṣu" is being recited.

Appendix I

EXCERPTS FROM VIŚVĀMITRA-SAṀHITĀ

(Chap. 14, Pratiṣṭha-vidhi)

प्रतिष्ठां श्रुणु विप्रर्षे देववदेवस्य शार्ङ्गिणां।
सर्वलोकेषु यद्वस्थु स्थावरं जङ्गमं तथा॥१॥

द्रुष्टं यच्छक्यते सर्वैः श्रोतुं वा द्विजसत्तम।
तेषामन्तर्बहिरपि व्यापकत्वेन संस्थितः॥२॥

तस्य विष्णोर्भगवतः प्रतिष्ठा कीदृशी भवेत्।
तथा हि मन्दबुद्धीनां विश्वासायभिधीयते॥३॥

धाम्नस्तु पूर्वदिग्भागे दक्षिणे चोत्तरेथवा।
पश्चिमे वापि कर्तव्यं मण्डपं कोणदिक्ष्वपि॥४॥

वर्जयेदन्तरालेषु मण्डपंस्य विनिर्मितिम्॥
षट्त्रिंशद्भिर्युतं स्तमभैर्यद्वा षोडशभिर्द्विजा॥५॥

द्वारैश्चतुर्भि सहितं दर्भमालाभिवेष्टितम्।
क्षौमपट्टवितानाढ्यं लम्बमुक्ता फलस्त्रजम्॥६॥

द्वारपार्श्वयुगन्यस्ततोयपूर्णघटै र्द्विज।
लेपितं गोमयाम्भोभिः सुधारेखाविचित्रितम्॥७॥

दीपमालापरिवृतं पुष्पमालाभिलम्बितम्।
विभाजयेच्च तन्मध्यमेकाशीतिपदैः समैः॥८॥

तन्मध्ये नवभिः कुर्यात् पदैर्वेदिं विधानतः।
वेदिं च परितः कुर्यात् कुण्डानि द्विजसत्तम।।।।

चतुरश्रं तथा चापं वृत्तं पद्मं चतुर्दिशम्।
मङ्गलान्यष्ट याज्ञीयैद्रुमैः कृत्वा च विन्यसेत्॥१०॥
भेरी च वृषभो नागश्चामरं केसरी तथा।
पताका ध्वजदीपांश्च मङ्गलान्यष्ट काश्यप॥११॥

प्रतिष्ठादिवसात् पूर्वं नवमें सप्तमेपि वा।
पञ्चमे वापि दिवसे मङ्गलाङ्कुररोपणम्॥१२॥
कुर्वीत विधिावद्रात्रिमुखे द्विजवरोत्तम।
अधिावासदिनात् पूर्वे दिने मुनिवरोत्तम॥१३॥

बिम्बस्य शुद्धये कुर्यात् जलाधिवसनं द्विज।
आचार्यो यजमानश्च मूर्तिपैः सहितस्तदा॥१४॥
स्नातः शुक्लाम्बरधरः स्वनुलिप्तः स्वलंकृतः।
यजमाननुकूलर्क्षे मुहूर्ते शोभने सति॥१५॥

पुण्याहवाचनं कुर्यात् ब्राह्मणैर्वेदपारगैः।
प्रोक्षणं पञ्चगव्येन कृत्वा स्थानस्य शुद्धये॥ १६॥

प्रविश्य कर्मशालायां प्रतिमामवलोक्य च।
अस्त्रोदकेन संक्षाल्य पीठं रत्नशिलामपि॥१७॥

रथमारोप्य बिम्बं तत् सर्वमङ्गलसंयुतम्।
तीर्थदेशं सामासाद्य नदीं वा पार्श्ववर्तिनीम्॥१८॥

पवित्रमन्त्रं प्रजपेत् त्रीन् वाराँस्तस्य शुद्धये।
क्षीरार्णवं जले तस्मिन् ध्यात्वा दारुमयं ततः॥१॥

पर्यङ्क नववस्त्रेण संछन्नं विन्यसेत्।
तस्मिन् प्रड्मंस्तकं देव शाययेन्मूर्तिपैर्द्विजैः॥२०॥

प्रागादौ शयनाद्बाह्ये कलशानष्ट विन्यसेत्।
तेष्विन्द्रादीन् समभ्यर्च्य बलिं च विकिरेत्ततः॥२१॥

कारयित्वा प्रपां तत्र तीरे वेदादि पाठयेत्।
गीतनृत्तादिभिश्चैव दिनशेषं नयेद्द्विज॥२२॥

रात्रौ च दीपान् प्रज्वाल्य रक्षां तत्र विधाय च।
गत्वा च मण्डलं तत्र विन्यसेद्द्विजपुंगवा॥२३॥

चक्राब्जं स्वस्तिकं वापि तस्य प्रागुत्तरे द्विज।
शालीनां दशभिर्भारैस्तण्डुलैश्च तदर्धकैः॥२४॥

तिलैस्तदर्धसंख्यैश्च मध्ये मध्ये पटास्तृतैः।
विधाय राशिं तस्योर्ध्वे विन्यसेत् कुम्भमुत्तमम्॥२५॥

तन्तुजालेन संवेष्ट्य क्षौमाभ्यामभिवेष्ट्य च।
निधाय कूर्चं रत्नानि नव हेमं तथाम्बुजम्॥२६॥

विन्यस्य पल्लवाँश्चास्ये तद्वक्त्रमपिधाय च।
कुम्भे च मण्डले चैव देवमावाह्य पूजयेत्॥२७॥

द्वारतोरणपूजां च पूर्ववत् सम्यगर्च्य च।
कुम्भमण्डलगे देवे पायसादि निवेद्य च॥२८॥

कुण्डे वह्निं प्रतिष्ठाप्य हुत्वा चाष्टसहस्त्रकम्।
समिच्चरूवृतैश्चैव पूर्णामपि विधाय च॥२॥

प्रतिष्ठितं द्रव्यगणमशेषमधिवास्य च।
गत्वा जलाशयं पश्चात् सर्वमङ्गलसंयुतम्॥३०॥

पाठयित्वा चतुर्वेदान् गापयित्वा च गीतकान्।
नर्तयित्वा च सरितो जागरेण नयेन्निशाम्॥३१॥

तदः प्रभातसमये गुरूर्मूर्तिपसंयुतः।
स्नातः श्वेताम्बरधरः कृतपौर्वाह्णिकक्रियः॥३२॥

अलंकृतो यथापूर्वं मण्डपं संप्रविश्य च।
द्वारतोरणकुम्भादीनभ्यर्च्य विधिना ततः॥३३॥

कुम्भस्थं विष्णुमभ्यर्च्य विधिना ततः।
कुम्भाष्टके च परितः शक्रादीनभिपूज्य च॥ ३४॥

मण्डलस्थं च देवेशं साङ्ग सपरिवारकम्।
आराधयित्वा नैवेद्यपश्चिमैर्भोगसंचयैः॥३५॥

वह्निमध्यस्थितं देवं संमिद्भिः सप्तभिः क्रमात्।
इष्ट्वा विकीर्या पुरतो बलिं गत्वा जलाशयम्॥३६॥

प्राप्ते पराह्ने तद्बिम्बं रथमारोप्य देशिकम्।
अलंकृत्य च दिक्संस्थैर्वेदानध्याप्य च द्विजैः॥३७॥

एकायनी पुरःशाखां पाठयित्वा च तां द्विजैः।
श्रीसूक्तं भद्रसूक्तं च शाकुनं सूक्तमप्यथा॥३८॥

पुंसूक्तं विष्णुसूक्तं च भगवत्प्रतिपादकान्।
मन्त्रानपि पठद्भिश्च वैष्णवैर्भगवन्मयैः॥३९॥

शङ्खकाहलसंमिश्रतुर्यघोषपुरस्सरम्।
सिद्धार्थानस्त्रसंजप्तानाचार्यो मूर्तिपैः सह॥४०॥

विकिरन्नगतो यायात् सर्वविघ्नोपशान्तये।
ग्रामं प्रदक्षिणं कुर्वन्नालयं संप्रवेशयेत्॥४१॥

अवतार्य शनैर्बिम्बं रथमण्डलसंनिधिम्।
जपन् नृसिंहस्य मनुं स्थापयित्वा तदग्रतः॥४२॥

विज्ञापयेन्मण्डलस्थं देवं तद्गतमानसः।
त्वत्समाराधनार्थाय देवदेव श्रियः पते॥४३॥

प्रकल्पितमिदं बिम्बं त्वद्भक्तहितकाम्यया।
प्रतिष्ठां कर्तुमिच्छमि प्रसीद रमेश्वर॥४४॥

विज्ञापनमिदं कृत्वा प्रणम्याष्टाङ्गसंयुतम्।
प्राप्यानुज्ञां च पीठोर्ध्वे बिम्बं तदुपवेश्य च॥४५॥

पुण्याहवाचनं कृत्वा द्वास्थानभ्यर्च्य पूर्ववत्।
कुम्भादिष्वपि चाराध्य हुत्वाग्नौ च गुरूत्तमः॥४६॥

कुण्डेषु मूर्तिपान् होतुं नियुज्य च समन्ततः।
आसाद्य बिम्बनिकटं सर्वदुष्टनिवारणम्॥४७॥

ज्वलत्प्रभं सहस्त्रारं ध्यात्वा तन्मन्त्रमन्त्रितान्।
सिद्धार्थान् प्रतिमामूर्ध्नि तन्मन्त्रेण विनिक्षिपेत्॥ ४८॥

शिल्पिशालोत्थदोषाणां शान्त्यै स्नपनमाचरेत्।
बिम्बस्य परितः कुम्भानष्टौ संस्थापयेद्गुरुः॥४९॥

आवेष्ट्य तन्तुभिर्वस्त्रयुग्मेनावेष्टय तान् बहिः।
क्षीरं शुद्धजलं रत्नतोयं हेमाम्बु गन्धकम्॥५०॥

फलपुष्पजल बीजतोयं पूर्वादि विन्यसेत्।
हेतिराजेन कलशान् साङ्गानष्टाभिमन्त्रितान्॥५१॥

तन्मन्त्रेणाभिषिञ्चेत् तं पूर्वादीशदिगष्टके।
अनेन स्नपनेनैव शिल्पिदोषो विनश्यति॥५२॥

ततश्च नववस्त्राभ्यां सदशाभ्यां च कौतुकम्।
संवेष्टयित्वा दृग्दानशयनं परिकल्पयेत्॥५३॥

वेदिकोपरि शालीनां दशभारान् विकीर्य च।
तस्योपरि पटं न्यस्य तण्डुलांस्तत्प्रमाणकान्॥५४॥

तस्योपरिष्ठाच्च तिलान् विकीर्य च पटोपरि।
सोपधानं कुशान् न्यस्य तस्योपरि च कौतुकम्॥५५॥

शाययित्वा प्राक्छिरसं स्वर्णसूच्या द्विजोत्तमः।
अस्त्राभिजप्तया नेत्रे प्रणवेनोल्लिखेन्मुने॥५६॥

सनेत्रं मनसा ध्यायन् परमात्मानमात्मनि।
ततः शिल्पिवरः स्नातः सिताम्बरधरः शुचिः॥५७॥

नेत्रमन्त्रितशस्त्रेण नेत्रे प्रकटयेत् सुधीः।
साम चान्द्रं वारुणं च सामगैः पाठयेद् द्विजैः॥५७॥

हेमपात्रस्थितं पश्चाद् घृतं मधु च दर्शयेत्।
नेत्रं प्रपूरयेत् ताभ्यां द्वादशाक्षरविद्यया॥५९॥

वौषट्कारान्तयोर्ध्वस्थहृन्मन्त्रेणामृतद्रवम्।
ध्यात्वा चान्द्रमसं बिम्बं मस्तकोपरि च स्त्रुताम्॥६०॥

ध्यात्वामृतस्य धारां च धेनुयुग्मं सवत्सकम्।
सौवर्णखुरश्रृङ्गद्वयं दर्शयेत् प्रतिमापुरः॥६१॥

ततस्तु कलशैर्देवं नवभिः स्नापयेद्द्विज।
ततोलंकृत्य देवेशं मात्रान्तं परिपूज्य च॥६२॥

निवेद्य पायसादीनि ताम्बूलं च निवेद्य च।
रथमारोप्य तद्बिम्बं प्रसादं परितो नयेत्॥६३॥

सर्वमङ्गलसव्याघ्रत्वचं विन्यस्य चोपरि।
क्षौमवस्त्रं तथास्तीर्य ह्यन्मन्त्रोच्चारणादिकम्॥६४॥

शेषरूपं च शयनं ध्यात्वा चैकाग्रमानसः।
अर्घ्याद्यैः पूजयित्वा च शिरः पार्श्वे धटं न्यसेत्॥६५॥

सुसूत्नं क्षौमवसितं शालिपीठोपरि स्थितम्
अर्घ्येण प्रोक्ष्य शयनं निद्राणं श्रीयुतं तथा॥६६॥

नतिप्रणवयुक्तेन स्वनाम्ना धूपपश्चिमम्।
सभाज्य बिम्बं शयने प्राङ्मूर्धानं च शाययेत्॥६७॥

अर्घ्यपूर्वैश्च धूपान्तैराराध्य प्राणिपत्य च॥
पीठं ब्रह्मशिलां चैव शालिपीठे पटास्तृते॥६८॥

शाययित्वा यथापूर्वं प्रणवेन सभाज्य च।
वाससा वर्मजप्तेन धूपितेनावगुण्ठ्य च॥६९॥

अर्चामन्येन वस्त्रेण छादयेत् पीठिकामपि।
प्रतिमापादपार्श्वस्थान् लाञ्छनान् स्वस्वमन्त्रकैः॥७०॥

स्वस्थानसंस्थितान् बुध्वा मूधिं द्वादशवाचकम्।
दामोदरात् केशवान्तमापादं द्वादशस्थले॥७१॥

विन्यस्य तच्छक्तिचयं तद्वद् व्यापकवत् पुनः।
द्विषट्कार्णं च मूर्धान्तमप्ययाख्येन भावयेत्॥७२॥

निश्चलं ज्ञानरूपं तत्कौतुकं प्रतिभाव्य च।
प्रणिपत्य च तद्बिम्बं तदा कुण्डसमीपतः॥७३॥

आज्यान्नतिलहोमं च प्रत्येकं पञ्चविंशतिः।
कृत्वा पूर्णहुतिं दद्याद्देशिको नियतात्मवान्॥७४॥

एकायनाश्चतुर्दिक्षु जुहुयुर्व्यूहमन्त्रकैः।
कोणेपु वैष्णवा होमं कुर्युर्मन्त्रैश्व वैष्णवैः॥७५॥

सर्वशाखोक्तैस्तथा चाग्निकोणादिषु समाहितः।
परं ब्रह्म स्वशक्त्यैव सर्वशक्तिशरीरकैः॥७६॥

अभीष्टं चिन्तयित्वाथ हृदये द्वादशाक्षरम्।
हृदयाङ्गसमायुक्तं ज्वलद्रूपं विभाव्य च॥७७॥

भूतशुद्धिविधानेन संहारान्तं च कौतुकम।
विचिन्तय परमां मूर्तिमापाद्य स्वयमेव च॥ ७८॥

कुमुदादिगणेशांश्च रक्षार्थं तेष्वनुक्रमात्।
आवाह्याभ्यर्चयित्वा च स्वैः स्वैर्मन्त्रैर्द्विजोत्तम॥७९॥

ततो मूर्तिपसंयुक्तो गत्वा प्रासादमध्यतः।
सर्वदुष्टोपशान्त्यर्थं प्रोक्षयेत् पञ्चगव्यकैः॥८०॥

हेतीशं क्षेत्रनाथं च पूजयेद्धूपपश्चिमैः।
आधारप्रमुखैर्मन्त्रैर्योगपीठान्तमर्चयेत्॥८१।

परितः पूर्ववत्कुण्डानष्टौ संकल्प्य देशिकाः।
शान्त्यर्थं चक्रमन्त्रेण द्विषडर्णेन वा हुनेत्॥८२॥

मूर्तिपाः स्वस्वमन्त्रेण जुहुयुः पूर्ववत् क्रमात्।
प्रशामय्य ततो दोषान् प्रसादं चाधिवासयेत्॥८३॥

प्रासादं देवदेवस्य प्रोच्यते सात्त्विकी तनुः।
तत्वानि विन्यसेत्पीठे यथा तत्वाधिवासयेत्॥८४॥

प्रकृत्यन्तानि पुरुषे बिम्बे त्वेवं प्रकीर्तितम्।
अध्वषट्कं तथा ध्यात्वा वर्णं शिखरसंस्थितम्॥८५॥

चातुरात्म्येन मन्त्रेण प्रणवाद्येन देशिकः।
कृत्वा च व्यापकन्यासं तच्छिरोन्तं मुनीश्वर॥८३॥

समाभ्यर्च्याथ हुत्वा च प्रोक्ष्य शान्त्युदकेन च।
आपोहिष्ठादिभिर्मन्त्रैः पवित्रमनुनापि च॥८७॥

गर्भगेह प्राङ्गणानि प्रोक्ष्येयुश्च मूर्तिपाः।
शयनस्थानमासाद्य साष्टाङ्ग प्राणिपत्य च॥८८॥

प्रतिमामूर्ध्नि दत्वार्घ्यं धूपान्तमभिपूज्य।
बिम्बस्य पादपार्श्वे तु बद्ध्वा पद्मासनं गुरूः॥८९॥

ध्यानाधिवासं कुर्वीत यथा तदवधारय।
मूलाधारानुबद्धाभिर्नाडीभिर्दशभिर्युतम्॥९०॥

अन्याभिस्तु शरिरस्थं व्याप्तं द्विजवरात्मज।
प्रतिमायां तथा देवी व्याप्तामेव विभाव्य च॥९१॥

श्रोत्रादीनं स्वस्वविषयादात्मन्येवोपसंहरेत्।
स्वहृत्पङ्कजमध्यस्थं ज्योतीरूपं विभाव्य च॥ ९२॥

स्वहृत्पद्मोदरे देवं बिम्बस्थं परिभाव्य च।
सूर्येन्द्वग्नि प्रभा सूक्ष्मां सुषुम्नां स्वान्तरस्थिताम्॥९३॥

बिम्बे चात्मनि च ध्यात्वा दक्षिणे न स्वदेहतः।
बिम्बस्य वावपार्श्वेन प्रविश्य हृदयाम्बुजम्॥ ९४॥

योगकाले यथा देवः स्वशरीरेनुभूयते।
समाधिना निश्चलेन तथा तं परिभावयेत्॥९४॥

कार्या तदेकता पश्चाद्यावद्विन्दति वै ततः।
द्वैधं कृत्वा ततो यावत् बिम्बं वामेन चात्मनः॥९६॥

दक्षिणेनाथ हृदयं प्रविशेद् द्विजसत्तम।
हृत्पद्ममध्यस्थं ध्यात्वैवान्मानमात्मना॥९७॥

ज्ञानस्वरूपममलं यावन्नाड्या च मध्यतः।
स्वमन्त्रोच्चारणेनैव द्वादशान्तं द्विजोत्तम॥९८॥

तत्संस्थितेन विभुत्ना भूत्वा सामरसः स्वयम्।
निष्पन्दस्पन्दतां गत्वा व्रजेत् स्वहृदयान्तरम्॥९९॥

ततश्च बिम्बहृदयं यथापूर्वं तथा व्रजेत्।
कृत्वा तदैक्यं तत्रापि द्वादशान्तं ततो व्रजेत्॥१००॥

तत्रापि पूर्ववद् बुध्वा हवा हृदयं संप्रविश्य च।
तस्मान्निर्गत्य हृदयात् प्रवशित्पूर्ववर्त्मना॥१०१॥

आत्महृन्मण्डलान्तःस्थमात्मानमनुभाव्य च।
इत्थं कौतुकमध्यस्थं चैतन्यं परिभाव्य च॥१०२॥

इतरेतरेन्द्रवत्तेजः संबन्धमनुचिन्तयेत्।
ब्रह्मानुसंधानमिदं कथितं द्विजसत्तम॥१०३॥

शब्दब्रह्मानुसंधानं श्रृणुष्वातः परं द्विज।
परं सूक्ष्मं तथा स्थूलमतिस्थूलं चतुर्विधम्॥१०४॥

विद्धि बिम्बं चतुःशब्दो यथा देहे व्ययस्तथा।
शब्द एव स्वदेहं च बिम्बं च मुनिसत्तम॥१०५॥

विधिनाप्ययसंज्ञेन वैखर्यामुपसंहरेत्।
शब्दं तद्वैभवं पूर्वं परस्मिन् ब्रह्मणि द्विज॥१०६॥

निस्तरङ्गदशापन्नस्पृष्टमार्गेण तत्स्वयम्।
परं ब्रह्म शब्दबिम्बं पूर्ववच्चिन्तयेन्मुने॥१०७॥

इत्थं शाब्दं स्वदेहं च कृत्वा तत्रैव विश्रमेत्।
सांनिध्यार्थं ततो मन्त्रसंयोगं विदधीत च॥१०८॥

सूर्यचन्द्रसहस्त्रभं स्वहृत्पङ्कजमध्यगम्।
स्वमन्त्रतन्त्रसंनादरूपेणाभिस्फुलिंगवत्॥१०९॥

ब्रह्मरन्ध्रेणोर्ध्वगेन निर्गत्य च तनोः पुनः।
प्रविशन्तं पुरस्तेन वर्त्मना स्वतनुं पुनः॥११०॥

ध्यात्वा च तत्स्थचैतन्ये देवतां संविभाव्य च।
अर्चारूपं च सकलमेवं व्याप्तं विभावयेत्॥१११॥

पृथ्वीमन्त्रानुविद्धं च पीठं रत्नशिलामयम्।
आधारशक्तिमन्त्रेण बिम्बेनैक्यं विभावयेत्॥११२॥

विभाव्येत्थं ततो विप्र मन्त्रन्यासं समाचरेत्।
न्यासेन रहितं वापि मन्त्रन्यासनमाचरेत्॥११३॥

प्रणम्य दण्डवत् पश्चादात्मायनसमर्पणम्।
विधायार्घ्यादिभिर्भोगैर्नैवेद्यान्तैः क्रमाद्यजेत्॥११४॥

इतिहासपुराणानां स्तोत्रणामपि पाठकान्।
दिग्विदिक्संस्थितान् कृत्वा मन्त्रानुद्घोषयेत् क्रमात्॥११५॥

ततश्च वेद्याः परितो विप्रानेकायनादिकान्
वैष्णवान् परितः स्थाप्य तत्तद्घोषणमाचरेत्॥११६॥

चतुर्दिक्षु चतुर्वेदपठनं कारयेद् द्विजैः।
वीणावेणुरवैर्मिश्रान् गीताशब्दांश्च घोषयेत्॥११७॥

नृत्तानां दर्शनं चैव कारयेत् परितः स्थितैः
यथाक्रमं मूर्तिधरैर्हवनं कारयेत्तथा॥११८॥

प्रत्येकं शतसंख्याकं कृतानां कर्मणां द्विज।
तत्वानां चैव शुद्ध्यर्थं हवनं कारयेन्मतम्॥११९॥

आधारशक्तिमन्त्रेण रत्नाधारशिलाहुति।
भूतमन्त्रेण पीठस्य हवनं विधिवच्चरेत्॥१२०॥

पूर्णाहुतिं विधायान्ते शान्तितोयेन चोक्षणम्।
बिम्बादीनां तथा कृत्वा विष्णुगायत्रया पुनः॥१२१॥

अर्घ्यादिभोगैर्यजनं कृत्वा तत्पादगौ करौ।
त्वत्सभाजनसिद्ध्येत्वद्रूपं कल्पितं विभो॥१२२॥

संनिधायात्र देवेश यावदाभूतसंप्लवम्।
त्वद्भक्तैर्विहितां पूजां गृहाण परमेश्वर॥१२३॥

गतिस्त्वमेव पर मा मज्जतां भवसागरे।
विज्ञापनमिदं कृत्वा प्रणमेद्दण्डवत्क्षितौ॥१२४॥

कुम्भमण्डलगं देवमभ्यर्च्य तदनु द्विज।
मन्त्राणां चैव च तथा न्यस्तानां तु विशेषतः॥१२५॥

अर्चागतस्यापि विभोरेकसंधानकारणात्।
घृतेन दध्ना पयसा मधुना च क्रमाद् द्विज॥१२६॥

अङ्धिनाभीश्च हृदयं स्पृष्ट्वा मूर्धानमेव च।
अनिरुद्धादिभिर्मन्त्रैर्हुत्वान्ते प्रोक्षयेत्क्रमात्॥१२७॥

स्पृष्ट्वाङ्गानि समस्तेन तत्तङ्गानि सर्वतः।
संप्रोक्ष्य सर्वगात्राणि द्विषडर्णेन होमयेत्॥१२८॥

पूर्णाहुतिं ततो दद्यादाज्ये नामाभिधाय च।
प्रासाददिक्षु जुहुयुस्तन्मन्त्रेण बलिं हरेत्॥१२९॥

मूर्तिपाः कुमुदादींश्च पूजयेयुः समन्ततः।
स्नात्वा प्रभाते ह्याचार्यो गत्वा यागनिकेतनम्॥१३०॥

प्रविश्याराध्य देवं च विज्ञाप्य तदनुज्ञाया।
अर्घ्यादिपात्रसहितो गत्वा च भगवद्गृहम्॥१३१॥

क्षेत्रशयजनं कृत्वा स्वमन्त्रेण द्विजोत्तम।
हुत्वाग्निमाज्येग्नि ततः पुर्णमपि विधाय च॥१३२॥

प्रासाददिक्षु जुहुयुस्तन्मन्त्रेणैव मूर्तिपाः।
पश्चाद्गर्भगृहं गत्वा सप्तभागं समं द्विज॥१३३॥

मध्यं ब्राह्मं तु तद्ग्राह्य दैवमानुषमन्वतः।
पैशाचं बाह्यगं स्थानं पैशाचादिपदत्रयम्॥१३४॥

परित्यज्याग्रतो विप्र पूजने चैकबेरके।
न्यसेद्रत्नशिलां ब्राह्मो यद्वा ब्रह्मासुरान्तरे॥१३५॥

बहुबेरे तत्र कुर्यात् श्रृणु स्थापनमुत्तमम्।
तत्र संस्थापनो देवो भक्तानामपि वाञ्छितम्॥१३६॥

प्रददाति द्विजश्रेष्ठ संपदः सकलांस्तथा।
दैवे वा मानुषे वापि संधौ वाथ तयोर्मुने॥१३७॥

बहुबेरप्रतिष्ठानं यद्वा स्याच्छयनासनम्।
कृत्वावटं ब्रह्मशिलामानात् किंचिदिवाधिकम्॥१३८॥

मध्ये तस्य द्विजवर द्वादशाङ्गुलविस्तृतम्।
कृत्वा मानं च तन्मात्र तस्मिन् हेमादिनिर्मितम्॥ १६९॥

अङ्गलीभिश्चतसृभिरुन्नतं विततं तथा।
हेमरत्नादिसंपूर्णं हेमपात्रं प्रजप्य च॥१४०॥

प्रणवाद्यन्तसंस्थेन विन्यसेद्विष्णुपूर्वया।
गायत्रया पूरयेद्गर्तं सुधया कारयेद् दृढम्॥१४१॥

ब्राह्मादितरसंज्ञेन शिलां तस्योपरि न्यसेत्।
मध्ये नवाम्बुजं कुर्यात् कर्णिकास्ववटं खनेत्॥१४१॥

रत्नानि विन्यसेत्क तेषु वज्रमैन्द्रे न्यसेद् बुधः।
याम्येम्बुजे गारुडं च मुक्तां वारुणपङ्कजे॥१४३॥

पद्मरागं न्यसेत् सौम्ये स्फटिकं वह्निकोणके।
सूर्यकान्तं नैऋते च नीलं वायव्यपंङ्कजे॥१४४॥

ऐशान्ये पुष्यरागं च मध्ये पद्मे च काश्यप।
समस्तलोहरचितं पद्मं न्यस्य तदूर्ध्वतः॥१४५॥

सौवर्णमग्निवसुधासूर्यकान्तं च वह्निके।
नैऋते चेन्द्रनीलं च वायव्ये पुष्यरागकम्॥१४६॥

ऐशान्यपद्मे वैडूर्यं स्फटिकं मध्यपङ्कजे।
रूप्यमैन्द्रे तथा याम्ये त्रपुं पश्चिमपङ्कजे॥१४७॥

कृष्णसीसमयः सारं सौम्ये ताम्रं तु निक्षिपेत्।
वह्नौ नैऋत एवं कृष्णं यो वायुपङ्कजे॥१४८॥

कांस्यमीशानपद्मे स्यात् स्वर्णं मध्यमप्कजे।
सर्वलोहमयं पद्मं मध्यमम्भोजमध्यतः॥१४॥

विन्यस्य तस्योपरि च कच्छपं स्वर्णनिर्मितम्।
देवीं च वसुधां न्यस्य नागराजं च रूप्यजम्॥१५०॥

प्रणवेनैव विन्यस्य सकलं वस्तुजालकम्।
हरितालं छिन्नपिष्टमञ्जनं स सुराष्ट्रजम्॥१५१॥

ऐन्द्रादिदिक्षु हृदये मांसीं द्विजवरत्मज।
वसां बिल्वं च विन्यस्य कोणेषु रजनीं पुनः॥१५२॥

सहदेवीं विष्णुपूर्वां कान्तामैन्द्र्यां क्रमान्न्यसेत्।
मध्यमे शङ्खपुष्पं च मूलमेषां च विन्यसेत्॥१५३॥

वासुदेवादिमन्त्रैस्तु दिक्षु कोणेषु निक्षिपेत्।
कोणेष्वध्यक्षपूर्वेषु सर्वद्रव्याणि विन्यसेत्॥१५४॥

रत्नादीनामलाभे तु मौक्तिकं स्वर्णमेव वा।
रजतं वाथ विन्यस्य हुत्वाज्यपयसा द्विज॥१५५॥

गृहीत्वा प्रणवेनैव प्रागाद्यं मध्यपश्चिमम्।
संछाद्य नववस्त्रेण सुधयालिप्य देशिकाः॥१५३॥

अभ्यर्च्य गन्धपुष्पाद्यैः पीठं तस्योर्ध्वतो न्यसेत्।
कारयित्वा च सुश्लिष्टं गर्तें पद्मं हिरण्मयम्॥१५७॥

तदूर्ध्वे गरुडं हैमं लघुरूपं निवेश्य च।
पञ्चगव्यं फलं पुष्पमोषधीरपि विन्यसेत्॥१५८॥

मन्त्रेण द्वादशार्णेन पुनः पैठीयदेवताः।
कालकूर्मादयः पूज्यास्तत्तन्मन्त्रैरनुक्रमात्॥१५९॥

तैरेव हुत्वा गत्वा च समीपं कौतुकस्य च।
नत्वा हृदयमन्त्रेण निरस्याच्छादितं पटम्॥१६०॥

भावयित्वा प्रबुद्धं च विभुं विज्ञापयेत्ततः।
पुण्डरीकाक्ष भगवन् सर्वलोकहिताय च॥ १६१॥

त्वद्भक्तानां विशेषेण विप्रादीनां महात्मनाम्।
प्रसादे स्थापयामि त्वां बिम्बरूपिणमव्ययम्॥१६२॥

संनिधत्स्वात्र देवेश क्षमस्व च दयां कुरु।
इत्थं विज्ञाप्य देवेशमुत्तिष्ठेत्यादिकं मनुम्॥१६३॥

पठन् बिम्बं समुत्थाप्य शयानं मूर्तिपैः सह।
यानमारोप्य पुरतः शिवसंकल्पमुच्चरन्॥१६४॥

प्रदक्षिणं परिभ्राम्य वेदघोषादिभिः सह।
अतो देवेतिमन्त्रेण प्रविश्याभ्यन्तरं द्विज॥१६५॥

पुण्याहवाचनं कृत्वा पौरुषं सूक्तमुच्चरन्।
प्रणवद्वयमध्यस्थद्वादशाक्षरविद्याया॥१६६॥

मूहूर्ते सुशुभे प्राप्ते कुम्भीकृत्य हृदन्तरे।
ध्यायन् विष्णुं परतरं परस्माच्छ्रीनिकेतनम्॥१६७॥

श्वभ्रे पीठस्य तां मूर्तिमचलां संनिवेश्य च।
समसूत्रेण संस्थाप्य नतोन्नतविशेषवित्॥१६८॥

वायुं विरेचयेत्पश्चाद्वाङ्मन्त्रेणैव मन्त्रवित्।
द्विषडर्णेन दत्वार्घ्यमन्त्रेण हृदयेन च॥ १६९॥

वज्रलेपितबिम्बं तद् दृढं निश्चलता नयेत्।
ततः स्वमन्त्रगगनात् पूर्णचन्द्रसमाकृतिम्॥१७०॥

ध्यात्वा तत्स्थसुधौघेन प्रतिमामभिषिच्य च।
ततस्तु नवभिः कुम्भैः स्नापयेत् परमेश्वरम्॥१७१॥

ततो निरुदकीकृत्य गर्भगेहं समन्ततः।
वस्त्रद्वयेन तद्बिम्बामघारोत्तरगेन च॥१७२॥

दृढं संवेष्टयित्वा च यथाशोभं च काश्यप।
हृदयस्थं तु तद्बिम्बं तत्सूर्यशतदीधितितम्॥१७३॥

विचिन्तयेत् परं रूपं व्याप्तं तेनैव चिन्तयेत्।
गर्भादिशिखरान्तं च बहिरन्तश्च तं मुने॥१७४॥

अङ्गनां त्रिविध षट्कं न्यसेद्ब्रह्मशिलादिषु।
मन्त्ररूपं तु यत्स्थूलं तत्राधारशिलाभवम्॥१७५॥

सूक्ष्मं ज्ञानदिगुणकं पीठयुक्तं तु तं स्मरेत्।
गुरूणां भागसंस्थं तत्परं बिम्बं च संस्मरेत्॥१७६॥

पीठदेशे पीठमन्त्रान् सर्वानेव निवेशयेत्।
प्रतीमादेहसंस्थाश्च सर्वमन्त्रान् द्विजोत्तम॥१७७॥

तत्पादाब्जयुगं पश्चात्कराभ्यामवलम्ब्य च।
शिरो निवेश्य तत्रापि गुरुर्विज्ञापयेत् प्रभुम॥१७८॥

भगवन् पुण्डरीकाक्ष शरणागतवत्सल।
मया दत्तां मन्त्रमूर्तिप्रतिष्ठां स्वीकुरु प्रभो॥१७९॥

सांनिध्यं कुरु देवेश त्वमत्र जगतः पते।
ज्ञानतोज्ञानतो वापि प्रभो कृतमिदं मया॥ १८०॥

क्षमस्व कृपया देव कृपया परया मयि।
वैष्णवाःपार्श्वगा ब्रूयुः करतालं विधाय च॥ १८१॥

एवं स्तुविचःस्तोत्रेः स्तुवीत द्विजवरोत्तम।
लक्ष्म्यादिशक्तिसहितं स्थापनं यदि काश्यपा॥ १८३॥

बिम्बेन सहितेनैव सर्वं कर्म समाचरेत्।
परिवारप्रतिष्ठानं यथास्थानं च कारयेत्॥१८४॥

मासेषु चैत्रवैशाखज्येष्ठेष्वपि च फाल्गुने।
पौष्करे तु विधातव्या प्रतिष्ठा मधुविद्विषः॥१८५॥

यजमानानुकूलेषु दिनेषु सुशुभेष्वपि।
पुनर्वस्वोरुत्तरेषु रोहण्यां श्रवणे तथा॥ १८६॥

रेवतीपुण्यहस्तेषु तथाश्विन्यां द्विजोत्तम।
सिते पक्षे तु पञ्चम्यां दशम्यामपि वा द्विज॥१८७॥

त्रयोदश्यां पौर्णमास्यां तिथिष्वेतासु कारयेत्।
सोमसौम्यगुरूणां च वाराः शुक्रस्य च द्विज॥१८८॥

प्रशस्ताःस्थापनविधौ श्रियो भर्तुर्मुनीश्वर।
गुरौ शुक्रे च मतिमानस्तंगतयोर्द्वयोः॥१९८॥

स्थिरराशिषु चैव स्यात् प्रतिष्ठा मधुविद्विषुः॥

Appendix II

EXCERPTS FROM AJITĀGAMA

(Kriyapada, Chap 40)

प्रतिमास्थापनं वक्ष्ये तच्छृणु त्वं समाहितः।
केवलं सोमकं चैव साम्बिकागुहमेव च॥१॥

सब्रह्मकेशवं चैव सोमश्रीविष्णुपद्मजम्।
सविष्णवर्धं सगौर्थमिति सप्तप्रकारजम्॥२॥

केवलं प्रथम तेषां वदामि सुरपुङ्गव।
केवलं केवलस्यैव शिवस्य स्थापनं भवेत्॥३॥

सर्वेषां स्थापनार्थाय मण्टपं चाधुनोच्यते।
प्रतिमाभेदःप्रासादाग्रेथवा तस्य दक्षिणेतरयोस्तु वा॥४॥

शांकरे वापि कुर्वीत सर्वलक्षणसंयुतम्।
पञ्चविंशतिहस्तैस्तु दशपञ्चकरैस्तु वा॥५॥

दशहस्तेथवा बेरे षोडशैः परिकल्पयेत्।
पञ्चहस्ते तु हस्तैस्तु तिथिसंख्यैः क्रमाद्भवेत्॥६॥

षट्त्रिंशत्स्तम्भसंयुक्ते प्रोक्तेस्मिन्मण्टत्रये।
वर्जयेद्देशिको धीमान्मध्ये स्तम्भचतुष्टयम्॥७॥

वेद्यर्थमथवान्येषां बेराणां मण्टपत्रये।

उत्तमं रविहस्तं तु मध्यमं सप्तहस्तकम्॥८॥

अधमं पञ्चहस्तं तु षोहशस्तम्भसंयुतम्।
कुर्यात्सर्वे च ते प्रोक्त रवितालसमुच्छ्र्याः॥९॥

वेदिका, कुण्डानि च तालमात्रतलोत्सेधद्वितालोत्सेधवेदिका।
तत्र कुण्डानि पूर्वादि लक्षणेनैव कारयेत्॥१०॥

वेदाश्रं योनिखण्डेन्दुत्रयश्राणि च सुवृत्तकम्।
षडश्रं पद्मकुण्डं च वस्वश्रं च प्रकल्पयेत्॥११॥

ईशानशक्रयोर्मध्ये प्रधानं च सुवृत्तकम्।
गोमयेनो पलिल्याथ मण्टपं कुण्डवेदियुक्॥१२॥

ब्राह्मणान्भोजयित्वात्र गोमयेनानुलेपयेत्।
पुण्याहं वाचयित्वाथ वास्तुहोमं च कारयेत्॥१३॥

स्थापनस्यात्र यत्पूर्वं कर्म तच्चाभिधीयते।
नेत्रोन्मीलनवर्जं तु निर्वृत्ते शिल्पिकर्मणि॥१४॥

वेदाश्रकुट्टिमे तत्र गोमयेनानुलेपिते।
सितपुष्पाक्षतोपेते स्थाण्डिले शालिनिर्मिते॥१५॥

पीठं तत्र समादाय प्रोक्षयित्वासिनाम्भसा।
विन्यस्याभ्यर्च्य चानन्तमासने तत्र मध्यमे॥१६॥

रत्नानि विन्यसेद्धीमान्मध्यादीशान्तदेशके।
माणिक्यं विन्यसेन्मध्ये शक्रे मरकतं न्यसेत्॥१७॥

वैडूर्यं वह्निदेशे तु नीलं याम्येथ नैरृते।
मौक्तिकं स्फटिकं वा पदिशि वायौ च पुण्यकम्॥१८॥

वज्रं तु सोमदिग्भागे प्रवालं शांकरे तथा।
विन्यस्य नवबीजैस्तु ततस्तत्रोपरि न्यसेत्॥१९॥

प्रतिमां स्थाप्य निष्कम्पां संश्लेषं कारयेद्दृढम्।
शिल्पिना कर्मदक्षेण नेत्रोन्मीलनमेव च॥२०॥

विधिना कारयेत्पश्चात्तद्विधानमथोच्यते।
अन्यत्र स्थण्डिलं कृत्वा तत्र देशे तु विन्यसेत्॥२१॥

ततश्च हेमसूच्या तु शिल्पिना दृष्टिमण्डलम्।
वर्तयित्वा ततः कृष्णज्योतिश्चाथ च वर्तयेत्॥२२॥

विसृज्य शिल्पिनं पश्चाद्यजमानेन सत्कृतम्।
पुण्याहं वाचयित्वाथ बेरशुद्धिपुरः सरम्॥२३॥

पञ्चमृत्पञ्चगव्यैस्तु तस्य शुद्धिरूदाहृता।
शुद्धिं कृत्वा मधुप्रस्थं घृतप्रस्तं तथैव च॥२४॥

पयसश्च ततः प्रस्थं लोहपात्रे विनिक्षिपेत्।
सौवर्णकमलं तेषु मध्वादिषु विनिक्षिपेत्॥२५॥

स्थाण्डिलं शालिभिःकृत्वा साष्टपत्रं सकार्णिकम्।
पद्मं तत्र समलिख्य तत्र देवं निवेशयेत्॥२६॥

तस्थाग्रे स्थण्डिले तत्र मध्वादीनपि विन्यसेत्।
बेरमभ्यर्च्य गन्धाद्यैः प्रणवं समुदाहरन्॥२७॥

मध्वादींश्चाथ संप्रोक्ष्य हृदयेन कुशाम्भसा।
दक्षिणादूर्ध्वगान्तं तु नयनानां क्रमेण वै॥२८॥

मधु दुग्धं धृतं चापि मुद्रितं धेनुमुद्रया।
हृदयेन प्रदर्श्यार्थ दूर्वया हैमया ततः॥२९॥

सूर्येन्दु वह्निवीजैस्तु क्रमेण परिकल्पयेत्।
तानि नेत्रेषु सर्वेषु सुवर्णनखसंयुतैः॥३०॥

तर्जन्यनामिकामध्यानखैः स्पृष्टा तु विन्यसेत्।
ततो यवनिकां तत्र व्यपोह्यतोद्यवाद्यकैः॥३१॥

ब्राह्मणांश्च सवत्सां गां गायत्रया संप्रदर्शयेत्।
ततोभिषिच्य देवेशं गन्धातोयेन गन्धतोयेन देशिकः॥३२॥

सर्वालंकारसंयुक्तं नीत्वा ग्रामप्रदक्षिणम्।
जलतीरे समे स्थाप्य जलैस्तैरभिषिच्य च॥३३॥

पञ्चविंशैः कुशैः कृत्वा कूर्चग्रन्थिं तु मूर्धनि।
न्यस्याथ परितः पादालम्बितैस्तु कुशैः सह॥
बेरं मूर्धादिपादान्तं नववस्त्रेण वेष्टयेत्।
पुण्याहं वाचयित्वाथ नद्यादौ तज्जले ततः॥३५॥

नाभिदध्नेथ गायत्र्या साधिपानि यथाक्रमम्।
षष्टिका नाडिकानां तु तदर्धं वा तदर्धकम्॥३६॥

नीत्वा प्रहरकं वापि तत उत्थाप्य देशिकः।
प्रतिमां तां रथे वाथ शिबिकायमथापि वा॥३७॥

साधकैः पुत्रकैर्वापि समारोप्यानयेत्ततः।
प्रतिष्ठामण्टपाद्वाह्ये कल्पिते स्नानमण्टपे॥३९॥

वेदिकातुल्यविस्तारे सोमेशानदिगास्थिते।
नालावटसमायुक्ते वेदिकोपरि विन्यसेत्॥४०॥

तत्र वस्त्रं सकूर्चं तु व्यपनीय यथापुरम्।
यथोक्तशुद्धिपूर्वं तु प्रतिमामभिषेचयेत्॥४१॥

जलाधिवासनं यत्र क्रियते तु विवर्जितम्।
शतशः प्रणवेनात्र कम्बुकेनाभिषेचयेत्॥४२॥

ततो मण्टपसंस्कारं कुर्यात्पुण्याहपूर्वकम्।
वितानं बन्धयेदूर्ध्वे दिग्ध्वजानष्टदिक्षु च॥ ४३॥

परितो दर्भमालां च मालायल्लवसंयुताम्।
मुक्तादामानि कोणेषु मालां सर्वत्र लम्बयेत्॥४४॥

विन्यसेद्वेदिपर्यन्ते साङ्कुरं चाष्टमङ्गलम्।
तोरणं चापि पूर्वादि विन्यसेत्क्षीरवृक्षजम्॥४५॥

वेद्यां भूमिं समभ्यर्च्य विताने चन्द्रमर्चयेत्।
वासुकिं दर्भमालायां वज्रादि दिग्ध्वजेषु च॥
अन्तस्तम्भचतुष्के तु धर्मादीन्परितो यजेत्।
आग्नेयादिषु कोणेषु वाह्येषु च रवींस्तश्चा॥४७॥

स्तम्भेष्वथ समभ्यर्च्य भद्रं च विजयं क्रमात्।
विजृम्भं लोहितं चैव तोरणेषु चतुर्ष्वपि॥४८॥

तत्र वेद्यां प्रकर्तव्यं स्थाण्डिलं तु मनोहरम्।
यवगोधूमशाल्याद्यैरष्टद्रोणैर्वरं भवेत्॥४९॥

तदर्धैर्मध्यमं प्रोक्तं तदर्धैरधमं भवेत्।
सुसितैस्तण्डुलैः कृष्णैस्तिलैश्चापि विकीर्य च॥५०॥

पद्ममष्टदलं कृत्वा शयनं तत्र कल्पयेत्।
दारूजं चर्मजं चैव रोमजं पक्षजं तथा॥५१॥

उपर्यास्तरणोपेतं शयनं पञ्चधा भवेत्।
दारूजं फलकं ज्ञेयं क्षीरवृक्षसमुद्भवम्॥५२॥

चर्मजं शयनं चर्म वैयाघ्रं चैणमेव वा।
रोमजं शयनं रोमकम्बलं पक्षिपक्षजम्॥५३॥

चतुर्थं शाल्मलीतूलसंभवं वा प्रकल्पयेत्।
उपर्यास्तरणं चापि केवलं सूक्ष्मवाससा॥५४॥

चर्मकम्बलतुलानामभावे वस्त्रमुच्यते।
दारूजादिभिरप्येतैरूपर्युपरि कल्पयेत्॥५५॥

कल्पिते शयने तस्मिन्कुशान्पूर्वोत्तराग्रकान्।
परिस्तीर्य तिलान्कृष्णाँल्लाजाञ्शुभ्रांश्च देशिकः॥५३॥

विकिरेच्च ततो मध्ये शयनेथ मनोन्मनीम्।
संपूज्य शाययेत्तत्र प्रतिमां प्रणवेन तु ॥५७॥

प्राक्शिरश्चोर्ध्ववक्त्रां तां पूर्ववद्बद्धकूर्चकाम्।
प्रच्छादयेत्सुरक्तेन वाससा बद्धकौतुकाम्॥५८॥

सुगन्धं साक्षतं तत्र पुष्पदूर्वासमायुतम्।
प्रणवेनैव मन्त्रेण प्रतिमोपरि विन्यसेत्॥५९॥

ततो देवाधिवासार्थं कुम्भान्विम्बफलप्रभान्।
द्रोणार्धतोयसंपूर्णान्सुपक्वान्दोषवर्जितान्॥६०॥

अष्टौ संगृह्य वैद्येशाञ्शैवमेकं तथाविधम्।
द्रोणपूर्णं तु संशोध्य प्रक्षाल्य हृदयेन तु॥६१॥

आवेष्टय तन्तुना सम्यक् समेन सुसितेन च।
!/!!नादेयेनाथकौपेन वारिणा शीतलेन च॥६२॥

चन्दनोशीरजैश्चूर्णैर्लवङ्गत्रुटिसंभवैः।
पुष्पैः सगन्धिभिश्चैव वासितेन प्रपूरयेत्॥६३॥

वस्त्रपूतेन गायत्रीं शैवीं सम्यगुदाहरन्।
तेषु शैवे क्षिपेत्पञ्चरत्नमन्येषु काञ्चनम्॥६४॥

सर्वेषु कूर्चं विन्यस्य पिधानैस्तु पिधाय च।
वस्त्रयुग्मेन शैवाख्यमावेष्टयान्यान् पृथक् पृथक्॥६५॥

संवेष्टयैकेन वस्त्रेण ततःशैवं तु विन्यसेत्।
प्रतिमायाः शिरोभागे दक्षिणे तानपि क्रमात्॥६६॥

पूर्वादिषु च विन्यस्य घटान्विद्येश्चरात्मकान्।
चतुर्दिक्षु परिस्तीर्य त्रिंशद्दर्भैः क्रमेण वै॥६७॥

पुण्याहं वाचयित्वा तु प्रोक्षयित्वास्त्रमुच्चरन्।
पाद्याद्यैः पूजयेद्देवाच्छिवादीन्देशिकोत्तमः॥६८॥

सुप्रसन्नमना भूत्वा तद्विधानामिहोच्यते।
कृतविद्यातनुर्मन्त्री प्राङ्मुखो वाप्युदङ्मुखः॥६९

पाद्यादीन्सम्यगापाद्य प्रोक्षयित्वा शिवाम्भसा।
ब्रह्मभिः पञ्चभिः सर्वानभिमन्त्रय यथाक्रमम्॥७०॥

मुद्रां च दर्शयित्वाथ सुरभि तेषु वस्तुषु।
प्राणवृत्तिनिरोधेन ध्यात्वा देवं यथाविधि॥७१॥

पुष्पैरञ्जलिमापूर्य तस्य मूलं समुच्चरन्।
प्रणवादि नमोन्तु तु साक्षान्मन्त्रतनुं शिवम्॥७२॥

आवाह्य कुम्भतोये तु प्रधाने मध्यसंस्थिते।
आवाहन्या ततश्चापि स्थापन्या स्थापनं भवेत्॥७३॥

संनिधिः संनिधान्या स्थान्निरोधिन्या निरोधनम्।
ततो नमस्कृतिं बध्वा दर्शयेच्च तदग्रतः॥७४॥

षडङ्गानि हृदादीनि पावकादिचतुर्ष्वपि।
कोणेषु तत्र विन्यस्य तद्दिक्ष्वस्त्रं च देशिकः॥७५॥

मृग्यैव मुद्रया न्यस्य नेत्रमीशानगोचरे।
शान्तां मनोरमां चैव मुकुलीं शशकर्णिकाम्॥७६॥

पद्मां च कालकर्ण्याख्यां षडङ्गनां प्रदर्शयेत्।
ततः पाद्यादिभिर्देवमर्चयेन्मूलमन्त्रतः॥७७॥

अङ्गैरङ्गानि चाभ्यर्च्य तत्तत्स्थानेषुमन्त्रवित्।
विद्येशांश्च क्रमाद्ध्यात्वा कुर्यादावाहनादिकम्॥७८॥

तेषां वज्रादिमुद्राश्च दर्शयेन्मन्त्रवित्तमः।
पाद्यमाचमनं चार्घ्यं गन्धं पुष्पं च धूपकम्॥७९॥

दीपं च क्रमशो दद्यात् सर्वेषां स्वस्वमूलतः।
ततो होमः प्रकर्तव्यस्तद्विधानमथोच्यते॥८०॥

तेषु कुण्डेषु सर्वेषु कृत्वा संस्कारमुत्तमम्।
अधिदेवान्यजेत्पश्चात्प्रागादिषु यथाक्रमम्॥८१॥

अधिदेवास्त्वति प्रोक्ता विद्येशाश्च समन्ततः।
प्रधान्ने शिव एवं स्यादर्चनं स्यात्स्वनामभिः॥८२॥

अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत्।
ततश्चाग्निमुखं हुत्वा होमयेद्द्रव्यसंचयम्॥८३॥

समिदाज्यचरूँल्लाजांस्तिलान् सर्षपकान्यवान्।
प्लक्षोदुम्बरकाश्चत्थवटवह्निसमुद्भवाः॥८४॥

अपामार्गर्कजाश्चैव रबदिराश्च समिद्भवेत।
पालाशी स्यात्प्रधानस्य तत्तत्परिधिसंयुता॥८५॥

यथोक्तॉलाभे सर्वत्र पलाशोदुम्बरावुभौ।
समिद्धोमं तु मूलेन सर्वत्र परिकल्पयेत्॥८६॥

आज्यादीन्यथ शेषाणि चाङ्गैर्हृदयपूर्वकैः।
अस्त्रान्तैजुहुयन्मन्त्री क्रमेणैव हुताशने॥८७॥

आचार्यो मूर्तिपैः सार्ध समकाले तु होमयेत्।
द्रव्यान्ते व्याहृतिं हुत्वा देशिकः प्रतिमां तथा॥८८॥

मूर्धादिपादपर्यन्तं मूलमन्त्रेण संस्पृशेत्।
ततः प्रागादिहोतारः स्पृशेयुः क्रमशस्तदा॥ ८९॥

तथैव षडभिरङ्गैश्च तत्तदङ्गेषु संस्पृशेत्।
सर्वद्रव्यावसानेषु सर्वकुण्डेषु चैव हि॥९०॥

मूर्तीनां कुण्डसंस्थानां प्रत्येकं तु शताहुतिम्।
होमकाले प्रयुञ्जीत ऋग्यजुः सामाथर्वणैः॥९२॥

वेदैरध्ययनं दिक्षु प्रागादिषु यथाक्रमम्।
ऐशान्यां दिशि तत्रैव साधकोस्त्रं जपेत्तदा॥९३॥

ततः कुम्भगतानां तु हविर्दत्वा यथाक्रमम्।
अधिवासनकर्मैवं समाप्य गुरूणा सह॥९४॥

होतारः सर्व एवात्र रात्रिशेषं तु जागरात्।
नीत्वा प्रातः समुत्थाय कृतनित्यक्रियास्तु ते॥९५॥

देशिकेन समाविश्य सुमुहूर्ते सुलग्नके।
देवानभ्यर्च्य कुम्भस्थान्प्रज्वाल्याग्निं समन्ततः॥९६॥

व्याहृत्यन्तं तु सर्वत्र मूर्तिमन्त्रैर्दशाहुतिम्।
हुत्वा सर्वात्मना पश्चात्सुचा पूर्णां प्रदापयेत्॥९७॥

परिषिच्य ततो मुर्तिमुद्वास्यानलसंश्रयाम्।
परिधीन्विष्टरांश्चापि गृहीत्वाभ्युक्ष्य च क्रमात्॥९८॥

वह्नौ विनिक्षिपेद्धीमांस्तत उत्थाय देशिकः।
नववस्त्रोत्तरीयं च नवोष्णीषाम्बरं दधत्॥९९॥

पञ्चाङ्गभूषणोपेतः सपवित्रकरो गुरुः।
देवमुत्थापयेद्वेद्याः प्रणवं समुदाहरन्॥१००॥

वस्त्रकूर्चादिकं सर्वमपनीय च होतृभिः।
तस्मिन्नध्येतुभिश्चैव काले स्वस्तयादिवाचकैः॥१०१॥

सातोद्यवाद्यैरन्यैश्च मङ्गलैस्तु समन्वितैः।
मण्टपे स्नानवेद्यां तु बेरं पीठे तु विन्यसेत्॥१०२॥

उपविश्योत्तरास्यं तु भद्रपीठे निराकुलः।
कृतविद्यातनुर्मन्त्री शोधयेत्प्रतिमां तदा॥१०३॥

हरिद्राद्यैस्ततः पञ्चगव्येन हृदयेन च।
अभिषिच्य ततः शुद्धिं भसितेन सितेन च॥१०४॥

शुद्धोदकेन संस्नाप्य ब्रह्मपञ्चकमुच्चरन्।
अभिषिच्य ततो दत्वा वक्त्रेणाचमनीयकम्॥१०५॥

प्रणवेन शिवस्यार्घ्यं दत्वा पुष्पं च मन्त्रवित्।
स्थापितं तु ततः कुम्भं प्रधानं देशिकः स्वयम्॥१०६॥

उद्धृत्योद्वाहयित्वाथ शेषान्कुम्भांश्च होतृभिः।
क्रमेण स्वस्वादिकसंस्थैः कृत्वार्चां च प्रदक्षिणम्॥१०७॥

अग्र तु स्थण्डिले तस्याः स्थापयित्वा यथा पुरा।
कृतविद्यातनुर्देवानर्चयित्वा यथाक्रमम्॥१०९॥

कुम्भस्थांस्ततो देवान् ध्यायेद्धदि समाहितः।
प्राणवृत्तिनिरोधेन तमेवाथ घटे जले॥१०९।

मन्त्रं प्राणस्थितिं मत्वा तस्मान्मूलं समुच्चरन्।
तत्कुम्भाम्भस्तु कूर्चेन गृहीत्वा प्रतिमाहृदि॥११०॥

स्त्रावयेत्कर्मणा तेन स देवः स्यात्प्रतिष्ठितः।
ततः उद्धृत्य तत्कुम्भं वत्सरेणाभिषेचयेत्॥१११॥

विद्येशानां तु कुम्भेभ्यः पूर्ववत्परितः क्रमात्।
तत्तन्मन्त्रांस्तु विन्यस्य तत्र तैरभिषेचयेत्॥११२॥

ततः सप्रणवं मूलं हृदये विन्यसेत्ततः।
अङ्गानि हृदयादीनि हृदयादिषु विन्यसेत्॥११३॥

अस्त्रं हस्ते तु विन्यस्य तारं शिरसि विन्यसेत्।
गायत्रीं वक्त्रदेशे तु मातृकाश्च ततो न्यसेत्॥११४॥

अकारं मूर्द्धनि चाकारं ललाटे नेत्रयोस्ततः।
इकारं कर्णयोश्चापि ईकारं विन्यसेत्ततः॥११५॥

उकारं कण्ठयोर्न्यस्य ऊकारं नासिकापुटे।
ओष्ठयोश्च तथा ऋ दन्तपङ्क्तिद्वयोः पुनः॥१११६॥

लृ लृ च विन्यसेत्कण्ठे एकारं चांसयोर्द्वयोः।
एकारं च ततो जत्रुद्वयोरोकारमेव च॥११७॥

औकारं स्तनमध्ये तु अंकारं जठरे तथा।
अ:कारं मेढ्रदेशे तु कचवर्गौ च पार्श्वयो:॥११८॥

टवर्गं प्टष्ठदेशे तु तवर्गं कटिदेशके।
ऊर्वेश्च पयवर्गौ च जङ्घयो: शहवर्गकौ॥११९॥

विन्यसेन्मुद्रया मृग्या सर्वाण्येतानि देशिक:।
एवं मन्त्रतनुं कृत्वा ततश्चाप्यभिषेचयेत्॥१२०॥

गायत्रया गन्धतोयेन पाद्यमाचमनार्घ्यकम्।
गन्धपुष्पं तथा धूपं वस्त्राभरणमेव च॥१२१॥

मालां नैवेद्यकं चापि हृन्मन्त्रेण प्रदापयेत्।
एवं बेरं प्रतिष्ठाप्य चलं चेदुत्सवं तत:॥१२२॥

तेनैव कुर्यात्तद्रात्रौ समारभ्य तु भौवनम्।
चलानामचलानां तु तथा चैवोभयात्मनाम्॥१२३॥

समाना स्यात्प्रतिष्ठेयं विशेष: कथ्यते धुना।
जलाधिवासनं नोक्तं मृण्मये तु कथंचन॥१२४॥

शयने चाधिवासश्च शेषं सर्वं समं भवेत्।
शूलस्थापनकाले तु रत्नन्यासविधिर्भवेत्॥१२५॥

अचलस्यापि शैलस्य विशेषोयं निदर्शित:।
अधिवास्य प्रभाते तु मन्त्रन्यासविधे: पुरा॥१२६॥

रत्नन्यासस्तु कर्तव्यस्तत: स्थापनमाचरेत्।
चित्राभासेषु सर्वेषु रत्नन्यासस्तु नो भवेत्॥१२७॥

जलाधिवासनं तदुच्छयनं न तथा भवेत्।
अचलेष्वेव कर्तव्यो रत्नान्यासश्चलेष्वपि॥१२८॥

कुर्याद्वा सर्वबेरेषु नयनोन्मीलनं भवेत्।
मन्त्रन्यासविधौ मन्त्री मृण्मये भित्तिचित्रके॥१२९॥

केवलेनैव कूर्चेन मन्त्रन्यासं तु कल्पयेत्।
अचले मृण्मये बेरे वर्णयुक्ते शिलामये॥१३०॥

मन्त्रकर्म जलोपेतं तस्याग्रे परिकल्पिते।
पीठे सर्वं प्रयुञ्जीत तालमात्रसमन्विते॥१३१॥

प्रभा वा पीठिका वापि यत्र बेरे पृथक्कृता।
कृत्वा शुद्धिं तयोः कुर्यात्पञ्चमृत्पञ्चगव्यकैः॥१३२॥

Appendix III

EXCERPTS FROM AJITĀGAMA

Vāstu-Pūjā (8th Paṭala)

अतः परं प्रवक्ष्यामि वास्तुपूजां यथाक्रमम्।
पूराभूत्पुरुषः कश्चिद्भुवनत्रयभीषणः॥१॥

भ्रुवनानि शरीरेण च्छादयन्भीमविक्रमः।
तं दृष्ट्वा सर्वदेवाश्च भीता ह्यासन्परस्परम्॥२॥

संप्रधार्य तु संभूय गृहीत्वा तमधोमुखम्।
अवष्टभ्य भुवः पृष्टे सहसैव न्यपातयन्॥ ३॥

स एव वास्तुरित्युक्तस्तस्याङ्गानि सुरासुरैः।
यत्र येन गृहीतानि तत्र तस्य बलिं हरेत्॥४॥

बलिं गृहीत्वा ते सर्वे प्रीणन्ति सुचिरं सुरः।
यदि तेषां तदा पूजा सुराणां न विधीयते॥५॥

तदा देवास्तदङ्गनि हित्वा गच्छन्ति वै ध्रुवम्।
गतेषु तेषु तद्वास्तु क्षीयते नात्र संशयः॥६॥

क्षयहेतुस्तदङ्गानां विक्षेपोत्र भविष्यति।
तस्मात्तद्वास्तु देहस्थानमरानर्चयेत् सुधीः॥७॥

ईशाने तु शिरो वास्तोः पादौ निऋतिगोचरे।
क्षिर्ब्रह्मणि विज्ञेयमेवमङ्गानि कल्पयेत्॥८॥

अन्येष्वङ्गेषु ये देवास्ते पूजायां पराश्रिताः।
यत्र प्रासाद अन्यद्वा क्रियते तत्र देशिकः॥९॥

भुवि निम्नोन्नतं सम्यक्समं कृत्वोपलिप्य च।
गोमयेन पुनः कृत्वा पुण्याहं तत्र देशिकः॥१०॥

सितपिष्टाक्त सूत्रेण प्रासादसमविस्तृतम्।
प्राङ्मुखं दशसूत्राणि तथोदीच्याननानि च॥११॥

आस्फाल्य तत्र संजातेष्वेकाशीतिपदेषु च।
ब्रह्मणश्च चतुर्दिक्षु स्थित्वा षट्पदभोगिनः॥१३॥

पूर्वाद्युत्तरपर्यन्तेष्वथ प्रोक्ता विदिक्षु च।
आपश्चैवापवत्सश्च सविता सावित्र एव च॥१४॥

इन्द्र इन्द्रचयश्चैव रुद्रजयस्तथा।
एते द्विपदभोक्तारश्चाष्टौ देवाः प्रकीर्तिताः॥१५॥

आग्नेयादिषु कोणेषु प्राक्पश्चिमपदाश्रयाः।
ह्य वीथीगतान्देवान्क्रमशोद्य वदामि ते॥१६॥

ईशानश्चैव पर्जन्यो जयन्तश्च महेन्द्रकः।
आदित्यः सत्यक भ्रंशावन्तरिक्षश्च पूर्वगाः॥१७॥

अग्निः पूषा च वितथो गृहक्षतयमौ तथा।
गन्धर्वो भृङ्गराजश्च मृगश्चैव तु दक्षिणे॥१८॥

पश्चिमे पितरश्चैव दौवारिकस्तथैव च।
सुग्रीवः पुष्पदन्तश्च वरूणश्चासुरस्तथा॥१९॥

शोषश्च पापयक्ष्मा च ते चाष्टौ कथिताः सुरः।
उत्तरे च तथा रोगो नागो मुख्यस्तथथैव च॥

भल्लाटश्च तथा सोम ऋगोदितिर्दितिस्तथा।
एकैकपदभोक्तारो द्वात्रिंशत्परिकीर्तिता:॥२१॥

ब्रह्माणं मध्यमे पूर्वे पूज्येद्देशिकोत्तमः।
पाद्यैराचमनार्घ्यैश्च गन्धपुष्प सुधूपकैः॥२२॥

दीपैश्च परमान्नं तु चरुं तस्य निवेदयेत्।
समर्यकस्य शुद्धान्नं मुद्ग न्न। तु विवस्वतः॥२३॥

गुडान्नं मित्रसंज्ञस्य दध्यन्न। पृथिवीधरे।
आपादीनामथाष्टानां यववेणुकुलत्थकैः॥२४॥

मापनिष्पावगोधूममसूरश्यामकैरपि।
मिश्रं चरूं क्रमेणैव दद्याद्रुदजयान्तकम्॥२५॥

द्वात्रिंशानामथेशान मुखानां च क्रमाच्चरूम्।
पृथक् पृथक् ससर्पिष्कं दद्यात्तेषां वदामि ते॥२६॥

मन्त्रान्ब्रह्मादिकानां तु क्रमेणैवामृताशिनाम्।
ओंकारमादितः कृत्वा हां हं हामिति चोपरि॥२७॥

वास्तोष्पते ब्रह्मणे च नम इत्यन्ततो भवेत्।
अन्येषामपि सर्वेषां स्वनामाद्यं तु वीजकम्॥२८॥

प्रणवेनसहोच्चार्य चतुर्थ्यन्तैः स्वनामभिः।
पृथक् पृथग्भवेन्मन्त्रस्तैस्तैर्मन्त्रैर्वलिं हरेत्॥२९॥

चरकी च विदारी च पूतना पापरक्षसी।
एताश्चतस्त्रो बाह्यस्थाः शक्तयः परवर्जिताः॥३०॥

प्रागादिषु क्रमात्तासां मांसोदनबलिं हरेत्।
बलिं समाप्य पश्चात्तु शाल्योद्धारं समाचरेत्॥३१॥

यजमानस्तदा त्वङ्ग संस्पृशेत्तत्र चैव हि।
वास्त्वङ्गे शाल्यमस्तीति निश्चित्यात्रव खानयेत्॥३२॥

शिरः स्पर्शे करोटिः स्नान्मुखस्पर्शेऽस्थि चैव हि।
बाहुस्पर्शे च दारूणि कण्ठस्पर्शे च लोष्ठकम्॥१३३॥

कुक्षिस्पर्शे तथा लोहमूरूस्पर्शे दृषद्भवेत्।
पादस्पर्शे भवेत्खड्गं पदस्थानि समुद्धरेत्॥३४॥

एवं कृत्वात्र शास्त्रज्ञो होमं चापि प्रकल्पयेत्।
समर्यकपदे तत्र होमस्थानं विधीयते॥३५॥

सैकतं स्थण्डिलं तत्र कृत्वा पूर्वमतन्द्रितः।
स्थण्डिलादिस्रुवान्तानां कृत्वा शुद्धिं यथाविधि॥३६॥

पञ्चसंस्कारमादौ तु कृत्वा तत्र हविर्भुजः।
ब्रह्माणं तत्र चावाह्य ब्रह्माग्निरिति चिन्तयेत्॥३७॥

पूजयित्वाथ गन्धाद्यैस्ततो होम समारभेत्।
हुत्वाग्निमुखमादौ तु परिषिच्य तु पावकम्॥३८॥

समिदाज्यचरुणां तु प्रत्येकं तु शताहुतीः।
ब्रह्मणे प्रथमं हुत्वा सर्पिषा सकलं ततः॥३९॥

समर्यकादिदेवानां चतुर्णां च यथाक्रमम्।
हुत्वा दशाहुतीस्तेषां स्वाहान्तं च स्वनामतः॥४०॥

आपादीनामथाष्टानामष्टौ प्रत्येकमाहुतीः।
ईशानप्रमुखानां तु प्रत्येकं पञ्चपञ्चतः॥४१॥

पूर्णाहुतिं ततो दद्याद्ब्रह्ममन्त्रेण देशिकः।
एकाहुतिप्रयोगेण स्वनामपदमन्त्रतः॥४२॥

चरकीप्रभृतीनां च जुहुयाद्देशिकोत्तमः।
परिषिच्य ततश्चाग्निमुद्वास्याथ समापयेत्॥४३॥

Appendix IV

EXCERPTS FROM SAME TEXT ŚAṄKU-STHĀPANĀ

(9th Paṭala)

शङ्कुच्छायाविधानेन वक्ष्ये प्राचीं विनिश्चिताम्।
देवविप्रनृपादीनां गृहारम्भविधेः पुरा॥१॥

उत्तरायणकाले तु शुक्लपक्षे शुभे दिने।
यजमानानुकूलक्षें शिल्पिना सह देशिकः॥२॥

विमले भ्युदयात्पूर्वं स्थापयेच्छङ्कुमुत्तमम्।
गृहीतवास्तुनो मध्ये दण्डमात्रं तु भूतलम्॥३॥

समं कृत्वा जलेनैव कृत्वा दर्पणवत्सुधीः।
तन्मध्ये लक्षणोपेतं तस्य लक्षणमुच्यते॥४॥

चतुर्विंशाङ्गुलोत्सेधं वरं तस्य प्रकल्पयेत्।
षडङ्गुलक्षये तस्मिन्मध्यमोत्सेध उच्यते॥५॥

तस्मात्षडङ्गुले हीने कन्यसोच्छ्रय उच्यते।
आयामसदृशं नाहं मूलेनास्य प्रयोजयेत्॥६॥

तत्त्रिभागैकभागेन शिरोनाहः प्रकीर्तितः।
शङ्कुमानेन तद्बाह्ये परितो मण्डलं लिखेत्॥७॥

मण्डलत्रितयं चैव कृत्वा सूत्रेण संमितम्।
पूर्वापराह्णयोश्छायां प्रवेशे चाथ निर्गमे॥८॥

छायाग्रयोगवृत्तेषु लक्षयित्वात्र लाञ्छयेत्।
पूर्वपश्चिमभागेषु मण्डलत्रयसंस्थिताः॥९॥

छायाकारा भवन्त्यत्र तानाश्रित्य च संस्थिताः।
पूर्वापरायता रेखास्तिस्त्रः कुर्याद्यथाक्रमम्॥१०॥

मण्डलाध्यधिके ह्रासो न्यूने वृद्धिर्यथा भवेत्।
कारयित्वा तथा धीमान्मध्यवृत्तस्य मध्यगम्॥११॥

पूर्वापरायतामेकां रेखां तदनुसारतः।
तन्मण्डलप्रमाणेन सूत्रेण सुमितं ततः॥१२॥

पूर्वपश्चिमपर्यन्त स्थितं पार्श्वक्रमेण तु।
दक्षिणोत्तरगं मत्स्यं जनयित्वा तथा पुनः॥१३॥

पार्श्वयोरपि तन्मानात्पूर्वपश्चिमयोरपि।
मत्स्यद्वयं पश्चात्प्राङ्मुखेषु च॥१५॥

तेनैव चतुरश्रेण प्रासादं त्वत्र कारयेत्॥१७॥

Appendix V

EXCERPTS FROM SAME TEXT ISHṬAKA-VIDHI

(10th Pāṭala)

वक्ष्याम्याद्येष्टकान्यासमतस्तल्लक्षणान्वितम्।
प्रसादस्य त्रिहस्तस्य भवेदेकाङ्गुलायता॥१॥

तदर्धविस्तरोपेता तदर्धधनसंयुता।
इष्टका सर्वधाम्ना च प्रोक्ता पक्वेष्टकात्मनाम्॥२॥

शिलाधाम्नि विशेषोयं कथ्यते सुरसत्तम।
उपर्युपरि दाम्नां च प्रतिहस्तविवर्धनम्॥३॥

दैर्ध्यतारधनेषूक्तमङ्गलार्धतदर्धकैः।
तासामग्रे भवेन्मूलं विकारांशविहिनकम्॥४॥

एवं कृत्वेष्टकाः पञ्च शिला वा विन्यसेत्तदा।
नन्दा भद्रा जया रिक्ता पूर्णा स्युर्नामतश्च ताः॥५॥

ततः प्रासादमानेन खनयेद्धरणीतलम्।
खातं पादप्रमाणेन भूपृष्टं तु शुभावहम्॥६॥

पादाद्वेदांशहीनेन खातं मध्यममुच्यते।
अधिष्ठानप्रमाणेन कन्यसं परिकीर्तितम्॥७॥

उत्तमानां विमानानां खननं चोत्तमं भवेत्।
मध्यमानां मध्यमं तदधमानां तथा भवेत्॥८॥

प्रथमं फलकोत्सेधं हित्वा श्वभ्रोपरीरितम्।
वालुकाभिः तु तत्रैव कृत्वा च त्रिदिनं सुधीः।
कुट्टयेत्सुदृढं सम्यग्गजपादैश्च दारूजैः॥१०॥

प्रसादगर्भं निश्चित्य सूत्रेण सुमितं तथा।
द्वारस्य दक्षिणे पार्श्वे भित्तिमध्यगतं यथा॥११॥

विन्यसेदिष्टका स्वस्मिन्नवटे च घनीकृते।
गोपुरेषु तथा प्रोक्तं प्राकारेष्वीशगेचरे॥१२॥

मण्डपेष्वथ सर्वेषु विशेषोयं निदर्शितः।
प्राचीमुखैस्त्रिभिः सूत्रैस्तथोदीचीमुखैरपि॥१३॥

मण्डलाभ्यन्तरं कृत्वा चतुष्केषु समन्वितम्।
चतुर्ष्वपि च कोष्ठेषु वह्नेर्वा शांकरे दिशि॥१५॥

कोणस्तम्भं परित्यज्य स्तम्भमूले तु विन्यसेत्।
शुद्धिं कृत्वा तु पञ्चानामिष्टकानामनुक्रमात्॥१५॥

पुण्याहां वाचयित्वादौ पञ्चभूतात्मकानि तु।
बीजानि तानि विन्यस्य देशिकः शान्तमानसः॥१६॥

शिल्पिहस्ते चतस्त्रश्च दापयेदिष्टकास्तदा।
तासामप्यधिवासं तु तेनान्यत्र प्रयोजयेत्॥१७॥

व्योमाक्षरसमोपेतां पञ्चामामुपरीष्टकाम्।
आचार्यो मण्टपे निशि पूर्वेधिवासयेत्॥१८॥

अधिवासविधिश्चाथ क्रमेण परिपठ्यते।
भूताब्धिनवहस्तेषु मण्टपेषु यथाक्रमम्॥१९॥

हीनमध्योत्तमानां च विमानानां यथाक्रमम्।
नवधा मण्टपं कृत्वा मध्ये कृत्वा च वेदिकाम्॥२०॥

प्रागादिषु पदेष्वग्नेः कुर्यादायतनानि च॥२१॥

चतुरश्रं धनुर्वृत्तं त्रिकोणं च यथाक्रमम्।
ऐशान्येष्टाश्रकं कुण्डं प्रधानमिति कीर्तितम्॥२२॥

स्थण्डिलान्यथवा कुर्यात्सिकताभिश्च तानि वै।
अलाभादेकहोमार्थं प्राच्यामेव प्रकल्पयेत्॥
गोमयेनानुलिप्याथ मण्टपं वेदिसंयुतम्।
पुण्याहं वाचयित्वाथ स्तम्भान्वस्त्रेण वेष्टयेत्॥२४॥

वितानध्वजसंयुक्तं दर्भमालासमावृतम्।
कदलीतोरणैर्युक्तं द्वारकुम्भसमन्वितम्॥२५॥

मङ्गलाष्टकसंयुक्त मङ्गलाङ्कुरशोभितम्।
कृत्वा तु वेदिकां मध्ये कारयेत्स्थण्डिलं सुधीः॥२६॥

अष्टद्रोणैस्तदर्धैर्वा तदर्धैर्वाथ शालिभि।
द्रोणैर्वाथ च तन्मध्ये पद्ममष्टदलं लिखेत्॥२७॥

तण्डुलैः पूरयेद्रेखा विकीर्य तिललाजकान्।
तत्र मन्त्रितकायस्तु गुरूर्घ्येकरस्तथा॥२८॥

सोष्णीषः सोत्तरीयश्च बद्धपञ्चाङ्गभूषणः।
कर्णिकायां यजेत्पूर्वं गन्धाद्यैस्तु मनोन्मनीम्॥२९॥

वामादि शक्तीः शक्रदिदलेष्वष्टसु पूजयेत्।
पश्चात्प्रतिसरं तस्याः पूर्णायाः षरिबन्धयेत्॥३०॥

कर्णिकायां तु तां पूर्णां पूर्वाग्रां विन्यसेत्सुधीः।
तां तां पिधाय तेनैव वस्त्रैण सुसितेन च॥३१॥

पूर्वभागे न्यसेत्कुम्भं रम्यं बिम्बफलप्रभम्।
षोडशप्रस्थसंपूर्णं सितसूत्रविचित्रितम्॥३२॥

गन्धतोयसमापूर्णं सकूर्चं वस्त्रवेष्टितम्।
पञ्चरत्नं जले क्षिप्त्वा पिधानमथ पल्लवम्॥३३॥

आधारशक्तिं तस्यां तु ध्यात्वा देवीं ततो न्यसेत्।
त्रिणेत्रां चतुर्भुजां शुभ्रां जटामकुटमण्डिताम्॥३४॥

शुक्लाभरण हृद्यङ्ग शुक्ल गन्धानुलेपनाम्।
दुकूलवसनां रम्यां गन्धाद्यैरर्चयेत्सुधीः॥३५॥

दलेष्वष्टसु चान्यांश्च पूर्वादिषु यथाक्रमम्।
तदर्धपरिमाणास्तु कलशांस्तादृशानपि॥३६॥

विन्यस्य तेषु दिक्पालान्यथास्थानं समर्चयेत्।
दिक्पालानांशक्तीनां हविः सम्यक्पृथक्पृथक्॥३६॥

दत्वा होमं समन्विच्छेद्यथास्थानं गुरूत्तमः।
होतारः साधकास्ते स्युरभावात् पुत्रकास्तथा॥३७॥

सद्यादिभिश्चतुर्दिक्षु यथाभागं तु होमयेत्।
ऐशान्यामीशमन्त्रेण समिद्धोमं प्रकल्पयेत॥॥३९॥

आज्यं तन्मूलमन्त्रेण चरूहोमं हृदा तथा।
लाजांश्च शिरसा हुत्वा यवाश्व शिखया ततः॥४०॥

सर्वात्मना तिलान्हुत्वा पूर्णां प्रासादतो हुनेत्।
द्रव्यान्ते व्याहृतिं हत्वा प्रतिद्रव्यं तु तां स्पृशेत्॥४१॥

तत्तन्मन्त्रैस्तु होतारः स्पृशेयुस्तदनन्तरम्।
तत्कालेध्ययनं कुर्याच्चतुर्वेदै श्चतुर्दिशि॥४२॥

ऐशान्यां प्राङ्मुखासीनो जपेदस्त्रं तु साधकः।
एकहोमविधाने तु विशेषोयं प्रदृश्यते॥४३॥

समिद्धोमःशिवेन स्यात्संख्याषट्शतमुच्यते।
पञ्चहोमे तदर्धं वा पादं वाथ च होमयेत्॥४४॥

एवं रात्रौ सुधीः कृत्वा देशिकः प्रतरुत्थितः।
कृत्वा नित्यक्रियाः सर्वा कृत्वा मन्त्रतनुं निजाम्॥४५॥

आधारशक्तिं तस्यां तु पूर्णायां कुम्भतो न्यसेत्।
ततोवटं समासाद्य देशे तत्स्थापनोचिते॥४६॥

प्रागग्रमुदग्ग्रं च कृत्वा रेखाचतुष्टयम्।
पदे च नवके तत्र परितोष्ट पदान्यपि॥४७॥

पदानि कुर्याच्चत्वारि तत्क्रमश्चाभिधीयते।
ईशानशक्रगे कृत्वा पदमेकं तथा पुनः॥४८॥

वह्निकीनाशगे कृत्वा रक्षोवरूणगे अपि।
वायुसोमगते तद्वत् स्थापनार्थं विचक्षणः॥४९॥

सुमुहुर्ते सुलग्ने तु नक्षत्रकरणान्विते।
नन्दाद्याश्च चतस्त्रश्च यजमानादिभिः क्रमात्॥५०॥

उद्धारयित्वा तन्त्रज्ञः सर्वातोद्यसमायुतम्।
प्रदक्षिणक्रमेणैवावटे समवतार्य च॥५१॥

उपविश्य गुरुः पूर्वं दक्षिणेनोपविश्य च।
पश्चिमे प्राङ्मुखस्यात्र शिल्पिनश्च ततस्तदा॥५२॥

हस्ते नन्दां गुरुर्दत्वा स्पृशंस्तेन निधापयेत्।
उत्तराग्रा भवेत्पूर्वा पूर्वाग्रा दक्षिणा भवेत्॥५३॥

पश्चिमा चोत्तराग्रा स्यात्पूर्वाग्रा चोत्तरा तथा।

एवं कृतेग्रमग्रं च मूलं मूलं च संयुतम्॥५४॥

भवेदीशनिर्ऋत्योश्च मूलाग्रौ वह्निवायुगौ।
तासां मध्ये वटे तोयमावर्त्य कुसुमान्वितम्॥५५॥

तस्यावर्तं समीक्ष्यादौ देशिकः शिल्पिना सह।
शुभं वदेत्तदा प्रज्ञ आवर्तमथ सव्यकम्॥५६॥

वामवर्तं विनिन्द्यं स्थात्तद्दोषविनिवृत्तये।
पश्चाद्धोमः: प्रकर्तव्यः समाप्तौ शान्तिसंज्ञितः॥५७॥

मध्यावटे ततो धीमान्रत्नानि नव विन्यसेत्।
ततो लोहानि धातूंश्च भीजानि क्रमशस्तथा॥५८॥

पूरयेच्चूर्णपिष्टेन मृदा वाप्यवटं ततः।
ततः पूर्णां ततोद्धृत्य पञ्चमामधिवासिताम्॥५९॥

तासामुपरि विन्यस्य तस्या मन्त्रमनुस्मरन्।
शक्तिकुम्भं ततस्तत्र समानीय विचक्षणः॥६०॥

कूर्चाम्भसा तु संप्रोक्ष्य तथान्यैः कलशैस्तदा।
यथास्थानं तदम्भोभिस्तत्तन्मन्त्रमनुस्मरन्॥६१॥
प्रोक्षयित्वा ततस्तत्र प्रासादं परिकल्पयेत्॥६२॥

Appendix VI

(EXCERPTS FROM SAME TEXT-UPAPĪṬHA

प्रासादमण्टपादीनामुन्नतार्थं विशेषतः।
शोभार्थं च समुद्दिष्टमुपपीठमतः श्रृणु॥१॥

द्विगुणं तदधिष्ठानात्पादोनद्विगुणं तु वा।
पञ्चांशं व्यंशकं वाथ भवेदर्धाधिकं तु वा॥२॥

पादाधिकं समं वाथ त्रिपादं वापि कारयेत्।
कृत्वोत्सेधं दशांशं चाप्येकद्वित्रिमिरंशकैः॥३॥

अधिष्ठानसमं बाह्ये निर्गमं त्रिविधं स्मृतम्।
त्रिद्वयेकदण्डमानं वा निर्गमं तत्त्रिधं भवेत्॥४॥

उत्सेधे द्वादशांशे तु द्वाभ्यां पादुकमुच्यते।
तदूर्ध्वे पद्ममंशेन क्षेपणं चार्धभागतः॥५॥

गलं भूतांशकं ज्ञेयं कम्पमर्धांशसमितम्।
अंशेन पद्ममूर्ध्वं स्याद्वाजनं चांशकेन तु॥६॥

कम्पमंशेन कर्तव्यमेवष्टाङ्गसंमितम्।
अथवा तत्समुत्सेधे त्रिसप्तांशसमन्विते॥७॥

नेत्रांशं पदुपानं स्याद्गुणांशं पद्ममुच्यते।
व्योमांशं कन्धरं प्रोक्तं द्वाभ्यां वाजनमेव हि॥८॥

एकेन कम्पमष्टांशैः कर्णं तत्र प्रकल्पयेत्।
अंशेन कम्पमंशाभ्यां वाजनं कम्पमंशतः॥९॥

कृत्वा षोडशधोदयं द्वयमितं कुर्यादुपानं तत-
स्तन्मानं कमलं च कम्पमथ तत्रैकेन कर्णं ततः।
भूतांशैरथ कम्पमेकमुपरि द्वाभ्यां च पद्मं ततो
द्वाभ्यामेव हि पट्टिकां तदुपरि व्योमाशकं कम्पकम्॥१०॥

कृत्वा सम्यगथोपपीठ उदयं चैकोनविंशांशकं
द्वाभ्यां पादुकमम्बुज द्वयमितं कम्पं शिवांशं भवेत्।
वस्वंशं गलमेकभागमथ तत्कम्पं च द्विद्व्यंशकं
पद्मं पट्टिकया भवेदुपरितः कम्पं खभागान्वितम्॥११॥

कृत्वा वा मनुभागमम्बुजमिदं तत्पादुकं पङ्कजं
व्योमाशं त्वथ कम्पमर्धमथ षड्भागैर्गलं कम्पकम्।
अर्धं पुष्करभागमम्बुजमतो द्वाभ्यां भवेत्पट्टिका
कम्पं चोपरि तस्य भागसहितं तत्रोपपीठं भवेत्॥१२॥

कण्ठे भूतगजव्यालसिंहयुक्तं यथा भवेत्।
तथा कुर्वीत मतिमान्पायुक्तमथापि वा॥१३॥

उपपीठं समारव्यातं सर्वधाम्नां समासतः॥१४॥

Appendix VII

(EXCERPTS FROM SAME TEXT-PRATIṢṬHĀ)

तत्र ब्रह्मशिलामध्ये स्थापयेल्लक्षणान्वितम्।
ततस्तल्लक्षणं चैव तत्स्थापनोचितम्॥१७७॥

क्रमेण गदत्तो मत्तः श्रृणु सर्वं जनार्दन।
उत्तमा लिङ्गविष्कम्भद्विगुणेन तु विस्तृता॥१७२॥

पादोनद्विगुणा मध्या भवेदर्धाधिकाधमा।
विस्तारेण समोत्सेधा श्रेष्ठा मध्या तदर्धतः॥१७३॥

तत्पादेन कृतोत्सेधा कन्यसी सा शिला स्मृता।
तन्मध्ये लिङ्गविष्कम्भमानेनैव सुसंस्थितम्॥

चतुरश्रं समं कुर्याद्वर्तं तत्खातमुच्यते।
ब्रह्मांशोत्सेध वस्वंशे व्योमांशार्धं तु तद्भवेत्॥
अथवाङ्गुलमानेन कल्पयेत्कत्कल्पवित्तमः।
पञ्चाङ्गुलं स्यात्तन्निस्त्रं लिङ्गे वै चोत्तमोत्तमे॥१७६॥

हस्तेष्वन्येषु सर्वेषु स्यादर्धार्धाङ्गलक्षयः।
नवावटानि तन्मध्ये सूत्रेण सुमिते सुधीः॥१७७॥

पदमध्यगतान्येवं कुर्यात् तत्तत्रियङ्गुलम्।
तदर्द्धं मध्यमं प्रोक्तं तदर्धमधमं भवेत्॥१७८॥

विस्तारसमनिम्नानि तानि सर्वाणि कल्पयेत्।
एवं तल्लक्षणं प्रोक्तं तत्स्थानं तु निगद्यते॥१७९॥

द्वारमध्यं विनिश्चित्य तस्मातसूत्रेण मध्यमम्।
ठु झ गर्भस्योपरि निश्चित्य तन्मध्य कं विधाय च॥

द्वारविस्तारमानं यदन्तर्गर्भगृहे स्थितम्।
चतुरश्रं समं कृत्वा गर्भगेहस्य मध्यमें॥१८१॥

द्वाविंशैः प्राग्गतैः सूत्रैस्तत्संख्यैरूदगायतैः।
एकत्र पिण्डितं तत्र चत्वारिंशच्चतुः शतम्॥१८२॥

सैकं च जायते व्यूहं पदानां तेषु मध्यमे।
पदे नवपदं कुर्यात्सूत्रेण सुमितं ततः॥१८३॥

अग्नेयपदमारभ्य वायोः पञ्चपदं त्यजेत्।
ठु झ ब्रह्मसोमेशशक्रणां पदानां तु चतुष्टये॥१८४॥

मध्यसंधिस्थसूत्रे ये प्रागुदक्प्रवणे कृते।
आगर्भं सम्यगास्फाल्य गैरिकात्तेन रज्जुन॥१८५॥

सूत्रसंधि स्फुटं ज्ञात्वा शिवसूत्रं तयोरपि।
प्रागायतं भवेदन्यत्सोमसूत्रमिति स्मृतम्॥१८६॥

ब्रह्मस्थानमिति ख्यातं तत्स्थाने स्थापयेच्छिलाम्।
यद्ब्रह्मशिलामध्ये सूत्रसन्धिस्थितिर्भवेत्॥

ततो मध्यावटे हैमं कूर्मं तत्र विनिक्षिपेत्।
समं दृढतरं वृत्तं द्वारस्याभिमुखं यथा॥१८९॥

ततो रत्नानि धातूनि बीजानि च ततः परम्।
गन्धं लोहं च वह्निं च विन्यसेदवटेषु च॥१९०॥

माणिक्यं मध्यमे न्यस्य शक्रे मरकतं न्यसेत्।

इन्द्रनीलं तु याम्यायां स्फटिकं वारुणे ततः॥१९१॥

वज्रं तु सौम्यदिग्भागे वैडूर्यं वह्निगोचरे।
मुक्तां निऋतिदिग्भागे पद्मरागं तु मारुते॥१९२॥

प्रवालमीशदेशे तु मध्ये पारदमेवच।
ततो धातुमयं चापि गैरिकं च मनशिशलाम्॥१९३॥

हरितालाञ्जने चैव माक्षिकाभ्रकमेव च।
सिन्दूरं च क्रमेणैव प्रागादिषु विनिक्षिपेत्॥१९४॥

अथ मध्येवटे शालीन्यवमुद्ग कुलत्थकान्।
निष्पावं च क्रमैणैव माहशासु विनिक्षिपेत्॥१९५॥

प्रियङ्गतिलनीवारसर्षपांश्च विदिक्षुच।
ततश्चन्दनं मध्ये तु कुष्ठलोहलवङ्गकान्॥१९६॥

कच्चोलं च तथाशासु जातितक्कोलकौ तथा।
काश्मीरं रोचनां चैव विदिक्ष्वपि च विन्यसेत्॥१९७॥

ततः काञ्चनरौप्ये च ताम्रं चैवारकूटकम्।
त्रपुसीसायःकांस्यानि पित्तलं च क्रमान्न्यसेत्॥१९८

विष्णुक्रान्तिं सहादेवीं मुसलीं श्रियमेव च।
भद्रामिन्द्रलता दूर्वां गिरिकर्णी च विन्यसेत्॥१९९॥

ततस्तस्यां प्रसन्नात्मा ब्रह्माख्यायां तु मध्यमे।
आधारशक्तिं विन्यस्य गन्धाद्यैरर्चयेद्गुरुः॥२००॥

ततो मन्त्रमिमं चापि जपेद्व्यक्तं कृताञ्जलिः।
त्वमेव परमाशक्तिस्त्वमेवासनधारिका॥२०१॥

शिवाज्ञया त्वया देवि स्थातव्यमिह सर्वदा।
विज्ञाप्यैव ततो लिङ्ग मूर्तिपैः सह देशिकः॥

अन्यैश्च बलवद्भिस्तु समुत्थाप्याहृतं ततः।
अपनीय शिरस्यर्घ्यं तदा मूलेन दापयेत्॥२०३॥

ततो रथे समारोप्य शङ्खदुन्दुभिनिस्वनैः।
गीतनृत्तसमायुक्तं कृत्वा धाम्नः प्रदक्षिणम्॥
प्रविश्य गर्भगेहान्तमर्घ्यं शिरसि विन्यसेत्।
ततो वतारयित्वा तु रथाल्लिङ्ग गतत्वरैः॥२०४॥

बलवद्भिर्नरैः पश्चाद्द्वारस्याभिमुखं तथा।
न्यस्य ब्रह्मशिलापार्श्वे ततो लग्ने गुणान्विते॥२०६॥

पुत्रमित्रादिभिः सार्धं कर्त्रा च फलकाङ्क्षिणा।
लिङ्गस्यानुप्रविष्टेन स्थितेनाग्रे प्रणम्य च॥ २०७॥

प्रार्थ्यमानः प्रतिष्ठार्थं शिल्पिना सह देशिकः।
सोष्णीषः सोत्तरीयश्च बद्धपञ्चाङ्गभूषणः॥२०८॥

स्थापयेदुदगास्यः सन्मन्त्रमीशानमुच्चरन्।
निशब्दं निश्चलं चापि सुस्थितं सुदृढं यथा॥ २०९॥

ऐशानीं दिशमाक्रम्य स्थितं स्वर्गापवर्गदम्।
लोकपुष्टिकरं चैव धनधान्यसुखावहम्॥
तस्मात्सर्वप्रयत्नेन स्थापयेदीशदिग्गतम्।
ऐन्द्रीं वैवस्यतीमाशां वारुणीमुत्तरामपि॥२१०॥

आक्रम्य सुस्थितं लिङ्ग ब्राह्मणादिसुखावहम्।
ततश्च पिण्डिकां तस्मान्मण्टपाद्वस्त्रवेष्टिताम्॥२१२॥

उत्थाप्य शक्तिमन्त्रेण रथे चारोप्य देशिकः।
ठु झ आनयेल्लिङ्गवद्ग र्भे रथादप्यवतार्य च॥२१३॥

लिङ्गाग्रे विन्सेत्पीठं ततः पार्श्वशिला न्यसेत्।
चतस्त्रस्ताः समुद्दिष्टाश्चतुरश्रमोच्छ्रयाः॥२१४॥

पिण्डिकां लक्षणोपेतां नन्द्यावर्तशिलोपरि।
उदङ्नालं यथा स्थाप्य विश्लेषं लिङ्गपीठयोः॥
जतुगैरिकसिक्थैस्तु सर्जगुग्गुलसंयुतैः।
गुडतैलसमायुक्तैः शर्कराचूर्णमिश्रितैः॥२१६॥

पाकेन सान्द्रतां नीतैनीरन्ध्रं तैः प्रकल्पयेत्।
यद्वा सर्जरसचूर्णं शर्करचूर्णसंयुतम्॥२१७॥

माहिषं नवनीतं च सममभ्युक्ष्य देशिकः।
तेन चावर्तयेद्विद्वान्संगतिं लिङ्गपीठयोः॥२१८॥

धनधान्यांशुकाद्यैस्तु कर्त्रा तत्रापि तोषितम्।
ततः शिल्पिनमुद्वास्य कृतकृत्यस्तदा गुरुः॥२१९॥

मूर्तिपैः सहितः स्नातः शिवव्रततनुस्तदा।
लिङ्गपीठस्थितानां च शुद्धिं कृत्वा क्रमेण तु॥
पुण्याहं वाचयित्वान्तर्गेहं संप्रोक्ष्य सर्वतः।
लिङ्ग तदम्भसा प्रोक्ष्य सर्वात्मानं समुच्चरन्॥
गौरीगायत्रिमन्त्रेण पीठं संप्रोक्ष्य मन्त्रवित्।
पाद्यमाचमनं चार्घ्यं पञ्चगव्यं यथाविधि॥२२२॥

संसाध्य वाग्यमी तत्र दत्त्वार्घ्यं लिङ्गमस्तके।
तो मण्टपमासाद्य सोष्णीषः सोत्तरीयकः॥२२३॥

पञ्चाङ्गभूषणेनापि भूतिः शान्तमानसः।
शिवशक्तयोतथा पूजां कृत्वा कुम्भस्थयोस्ततः॥२२४॥

विद्येश्वराणामभ्यर्च्य शास्त्रोक्तं सम्यगाचरेत्।
शंखदुन्दुभिनिर्घोषैर्गीतनृत्तैश्च मंगलैः॥२२५॥

शैवं स्वयं समुद्धृत्य देशिकः सोधिरोप्य च।
वामे दक्षिणहस्तेन कुम्भवक्त्रं विगृह्य च॥२२६॥

मूर्तिपैः शक्तिकुम्भादीन्वहद्भिस्तद्वदेव सः।
अनुयातो गुरुः कर्त्रा पुत्रबन्धुयुतेन च॥ २२७॥

प्रदक्षिणमुपावृत्य प्रासादं प्रविशेत्ततः।
ठु झ अग्रे क्रमेण संस्थाप्य स्थाण्डिलोपरि तान्घटान् ॥ २२८॥

उत्तराभिमुखो भूत्वा कृत्वा मन्त्रात्मिकां तनुम्।
उत्थाय पञ्चगव्येन सर्वात्मानं समुच्चरन्॥

अभिषिच्य च तल्लिङ्ग पुनर्गन्धोदकेन च।
ततश्चासनमप्यत्र लिङ्गमूले प्रयोजयेत्॥२३०॥

तत्र मूर्ति समावाह्य लिङ्गे सादाशिवं तथा।
ठु झ विद्यादेहं च संकल्प्य ततः कुम्भेषु देवताः॥२३१॥

यथाक्रमेण संपूज्य चार्घ्यगन्धादिभिस्तथा।
मूलमन्त्रं समुच्चार्य शिवकुम्भस्थितं शिवम्॥२३२॥

तस्मात्कुम्भात्समादाय मन्त्रमूर्तिं तदम्भसा।
कूर्चाग्रनिसृतेनैव न्यसोल्लिङ्गस्य मूर्धनि॥२३३॥

ततः कुम्भस्थतोयेन शनैः कालात्मनाणुना।
अभिषिच्य ततश्चापि शक्तिमाधारूपिणीम्॥२३४॥

तन्मन्त्रेणैव तत्कुम्भं तथा पीठे च विन्यसेत्।
तस्या गायत्रीमुच्चर्य तेन कुम्भेन पिण्डिकाम्॥२३५॥

अभिषिच्य ततो ष्टौ च चक्रवर्तिक्रमेण वै।
पीठे शक्रादि संयोज्य स्वनामपदमन्त्रकैः॥२३६॥

अभिषिच्य ततः पश्चात्कुर्याद्गन्धाम्वुना सुधीः।
ठु झ अभिषेकं ततो दत्वा मूर्धस्वर्घ्यं च पञ्चसु॥२३७॥

तत्तन्मुखाणुभिर्मन्त्री ततो मन्त्रान्क्रमान्न्यसेत्।
ठु झ प्रणवं प्रथमं मूर्धि कालात्मानं ततो न्यसेत्॥२३८॥

तदङ्गभूतान्मन्त्रांश्चव तत्तदङ्गेषु विन्यसेत्।
ईशानाद्यथ सद्यान्तं पञ्चब्रह्माण्यनुक्रमात्।।२३९।।

मध्ये पूर्वे ततो याम्य उत्तरं पश्चिमेपि च।
ठु झ स्वस्वमुद्राप्रयोगेण विन्यसेच्च कालास्ततः।।२४०।।

शक्तिभिः सह लिङ्गस्य स्थानेषूक्तेषु विन्यसेत्।
तथा तत्रोच्छ्रिताङ्गुष्टं मुष्टिं बध्वा तु विन्यसेत्।।

लिङ्गाग्रे पीठिकायां तु शक्तिगायत्रिमभ्यसेत्।
ततो ङ्गुष्टं शिवे कृत्वा शिवगायत्रिमभ्यसेत्।।२४२।।

एवं स्यान्मुक्तिकामस्य शिवशक्त्योस्तु संगतिः।
विपरीतविधानेन भुक्तिकामस्य सा भवेत्।।२४३।।

पिण्डिका तु भवेच्छक्तिर्लिङ्ग तु परमेश्वरः।
तयोर्यः क्रियते योगः सा प्रतिष्ठेति कीर्तिता।।२४४।।

Appendix VIII

EXCERPTS FROM ŚRI-PRAŚNA-SAṀHITĀ

MAṆṬAPA-PRATIṢṬHĀ (Chapter-19)

द्वारेषु स्युश्चतृषु च प्रतिष्ठामण्डपस्य तु।
अश्वत्थोदुम्बरवटप्लक्षाः प्रागादितोरणाः॥१॥

चतुर्णामप्यलाभे तु वृक्षेणैकेन कल्पयेत्।
यद्वा चन्दनवृक्षेण सर्वं कुर्याद्यथाविधि॥२॥

सप्तहस्तायता वापि पञ्चहस्तायतास्तु वा।
वृत्ता वा चतुरश्रा वा द्वाविंशत्यङ्गुलैर्घनैः॥३॥

युक्ता वा द्व्यङ्गुलघना विस्तारस्तु षडङ्गुलः।
पूर्वोक्तनहनेनापि फलकाकृतिनापि वा॥४॥

आयामं द्विभुजं कुर्यात् तोरणोपर्यु दुम्बरम्।
संज्ञाभेदन तस्यैव पट्टिकेत्यभिधीयते॥५॥

तस्य मध्ये चक्रमेकं पार्श्वयोर्गरुडावुभौ।
फलकेनैव कल्प्या स्युस्तोरणं तोरणं प्रति॥ ६॥

द्वौ द्वौ ध्वजौ प्रतिद्वारं वर्णभेदैरलंकृतौ।
द्वाविंशत्यङ्गुलायामास्तदर्धेन च विस्तृता:॥७॥

फलका द्व्यङ्गुलघनाः यज्ञवृक्षसमुद्भवाः।
स्वर्णादिलोहजा वापि संपाद्य तदनन्तरम्॥८॥

एतेषु विलिखेद्धमानष्टमङ्गलनामकम्।
श्रीवत्सं वनमालां च भेरीं दर्पणमेव च॥९॥

मत्स्ययुग्मं च शङ्खं च चक्रं काश्यपनन्दनम्।
पद्मासनानामेतेषामुभयोः पार्श्वयोरपि॥१०॥

दीपस्तम्भांश्चामराणि छत्रं शिरसि वै लिखेत्।
बिम्बानुरूपं स्नानस्य जलाधिवसनस्य च॥११॥

औदुम्बरं भद्रपीठमाचार्यस्यार्तिवजामपि।
पीठानि पादुकाश्चापि यज्ञवृक्षेण कल्पयेत्॥१२॥

यज्ञपात्राणि सर्वाणि शरावादीनि वै रमे।
षडङ्गुलान्युच्छ्रि तानि विस्तृतान्यायतानि च॥१३॥

तेषां मध्ये तु निम्नानि ह्यधस्ताच्चतुरङ्गुलम्।
पञ्चाङ्गुलं चोर्ध्वभागे विशालं कल्पयेद् गुरुः॥१४॥

ध्वजान् कुम्भान् सकरकान् धान्यानि विविधानि च।
शालिभारांस्तण्डुलांश्च तिलान् वस्त्राणि वै रमे॥१५॥

रत्नानि चैव धान्यानि गावः कन्याश्च मृत्तिकाः।
घृतादीनि च वस्तूनि पूर्वं संपादयेद् गुरुः॥१६॥

श्लक्ष्णा न सुषिराः कुम्भाश्चतुर्विंतशाङ्गुलोन्नताः।
सौवर्णा राजतास्ताम्राः कल्प्या भेदविवर्जिताः॥१७॥

विस्तृतेर्मध्यतस्तद्वत्तद्गलं त्र्यङ्गुलोन्नतम्।
ततमङ्गुलिषट्केन तदास्यं त्र्यङ्गुलं स्मृतम्॥१८॥

मेखला परितो ज्ञेया त्र्यङ्गुला जलजोद्भवे।

यद्वा ततर्धमानं तु सर्वमुच्छ्रायपूर्वकम्॥१९॥

यद्वोत्तमोत्तमो भद्रे द्रोणमानोदपूरकः।
तदर्धमंशतोन्यूनं प्रस्थद्वयजलावधिः॥२०॥

अनुकल्पे मृण्मया वा छिद्रभेदविवर्जिताः।
न द्वितप्ताः सुतप्ताश्च कृष्णवर्णादिवर्जिताः॥२१॥

महाकुम्भार्धमानेन करकं तु प्रकल्पयेत्।
तस्योदरे कोणयुक्ता जलनिर्गमनी भवेत्॥२२।

स्नानार्थं द्वारकुम्भादि स्थापनार्थं घटान् रमें।
पूर्वोक्तार्धप्रमाणैर्वा लोहैर्वा कल्पयेद् गुरुः॥२३॥

लक्षणं पालिकादीनां संख्यां च श्रुणु वल्लभे।
साङ्गुलं हस्तमुत्सेधं षोडशाङ्गुलमाननम्॥२४॥

तावदङ्गुलमायामं कण्ठान्तं तस्य वै भवेत्॥
कण्ठवर्तुलविस्तारं सप्ताङ्गुलमुदीरितम्॥२६॥

एवं कृते मध्यबिलादुपर्यमम्भोजवद्भवेत्।
अधश्चोन्मत्तकुसुमसमं चेत् पालिकां विदुः॥२७॥

घटिकालक्षणं वक्ष्ये निबोधा कमलोद्भवे।
सा द्वादशाङ्गुलायामा ष्ट्यङ्गुलविशालता॥२८॥

उदरं तु प्रधानास्य विस्तारं तु षडङ्गुलम्।
उदरे च चतुर्दिक्षु चतुरङ्गलमायतम्॥२९॥

चतुरङ्गुलविस्तारं कल्पयेच्च चतुर्मुखम्।
घटिकालक्षणं त्वेवं पञ्चवक्त्रा घटाकृतीः॥३०॥

शरावस्य त्वङ्गुलयोर्विस्तारो द्वौ च विंशतिः।
उत्सेधोङ्गलिविंशत्या ह्यधश्चाष्टाङ्गुलिर्भवेत्॥३१॥

प्रत्येकमुत्तमा संख्या षट्त्रिंशो मध्यमा रमे।
षोडश स्युर्हीनसंख्या त्वष्टौ हीनमतो नहि॥३२॥

सर्वार्थे पालिका वापि ह्यष्टौ वित्तानुसारतः।
देवतानां प्रतिष्ठादिकार्ये युग्मास्तु पालिकाः॥३३॥

भक्तबिम्बप्रतिष्ठादि मनुष्याणां तु शोभने।
अयुग्माः स्युः पालिकाद्यास्तेषां भेदं कदाचन॥३४॥

न कुर्याद्यदि कुर्वित दोषाय महतो भवेत्।
परितो मण्डपस्य स्युरलंकारर्थपालिकाः॥३५॥

यथा प्रतिष्ठादिवसात् सप्तमे नवमेपि वा।
साङ्कुराश्च भवेयुस्तास्तथा कल्प्या गुरूत्तमैः॥३६॥

मण्डपस्य प्रतिष्ठायाः परितो वेदवादिनाम्।
स्थित्यर्थं तु प्रपां कुर्यात् क्षीरसागरसंभवे॥३७॥

देशान्तरादागतानामृग्यजुः सामशाखिनाम्।
इतरेषां ब्राह्मणानां सर्वविद्याभिशोभिनाम्॥३८॥

वासार्थं शयनार्थं च भोजनार्थं च सर्वतः।
प्रपां कुर्यात् तृतीयादौ प्राकारे वीथिकासु च॥३९॥

(Chapter 20)
BIMBA-PRATIṢTHA

अङ्कुरार्पणकार्यस्य दिनं निश्चित्य देशिकः।
ततः पूर्वदिने तावत् प्रतिष्ठामण्टपं तथा॥१॥

गर्भगेहादिसर्वाणि पचनागारमेव च।
आस्थानमण्टपादीनि गोपुराणि तथैव च॥२॥

द्वाराणि च कवाटानि सलिलैः शोधयेत्पुरा।
धाम्नो भित्तिषु सर्वत्र श्वेतरक्तादिवर्णकैः॥३॥

चित्रयेच्चित्रकारस्तु सर्वत्र कमलोद्भवे।
दर्भाणां चैव मालाभिर्नालिकेफलस्य च॥४॥

पनसस्य च पूगस्य कदलीनां फलस्य च।
बन्धयेत् सर्वतो गुच्छान् वितानानि च सर्वतः॥५॥

मण्टपादिषु सर्वत्र प्रतिद्वारं फलैयुतान्।
द्वौ द्वौ स्तम्भान् कदल्यास्तु पार्श्वयोरपि बन्धयेत्॥६॥

ध्वजैर्वन्दनमालाभिः सर्वतो धाम शोभयेत्।
तथा प्रपां प्रतिष्ठायां अङ्कुरार्पणकर्मणः॥७॥

वितानाद्यैरलकृत्य तयोः प्राच्यादिषु क्रमात्।
ऐन्द्रश्वत्थं दक्षिणस्यामौदुम्बरमुदीरितम्॥८॥

न्यग्रोधं पश्चिमस्यामुत्तरे प्लेक्षतोरणम्।
द्वितालं भूतलं खात्वा स्थापयेत्तोरणान् दृढम्॥९॥

ध्वजौ द्वौ द्वौ प्रतिद्वारं स्थापयेदुपरि क्रमात्।
त्तिरस्करिण्या सर्वत्र मण्डपं परिगूहयेत्॥१०॥

कर्पूरागरुकस्तूरिचन्दनैर्देवदारूभिः।
निर्यासानां विशेषैश्च धूपैः संमूर्च्छयेत्! प्रपाम्॥११॥

ततो भूमिं यथावच्च गोमयैर्लेपयेद् द्विजैः।
शोध्येच्च शलाकाभिरलंकुर्यात् सुधादिभिः॥१२॥

बहिः प्रपलायाश्चतृषु द्वारेषु कनकप्रभे।
सत्यादिलिखितान् केतूनुपरिष्टात्तु बन्धयेत्॥१३२॥

अथाचायः। शिल्पिशालां शिल्पशास्त्रार्थ तत्ववित्।
मूलादिसर्वबिम्बानि पश्येच्छास्त्रोक्तवर्त्मना॥१४॥

शिलामयस्य वार्क्षस्य लोहेनोत्पादितस्य च।
नयनोनमीलनं कार्यं शिल्पिना कारूमन्दिरे॥१५॥

नेत्रदानं गर्भगेहे शिल्पिना कारयेत् सुधीः।
शिलामयादिबिम्बनां कृत्वा मन्त्राभिषेचनम्॥१७॥

रथादिषु समारोप्य सर्ववादित्रनिःस्वनैः।
वेदघोषैर्वीथिकासु प्रादक्षिण्येन वै हरेः॥१८॥

गर्भगेहं समानाय्य पीठे ब्रह्मशिलामये।
गर्तेषु नवसु स्वर्णरत्नादीनि पुरा न्यसेत्॥१९॥

प्रतिगर्तं पञ्चसंख्यां तत‌द्भेदं वदामि ते।
वज्रं सुवर्णसहितमुशीरं व्रीहयस्तथा॥॥२०।

ऐन्द्यां दक्षिणतो गर्ते त्विन्द्रनीलमयस्तथा।
तिलं सीसं चन्दनं च पश्चिमे मौक्तिकं तथा॥२१॥

रजतं पारदं चैव मुद्ग ोशीरं तथोत्तरे।
पद्मारागं कांस्यराजशिलां राजेन्द्रमेव च॥२२॥

प्रादक्षिण्येन निक्षिप्य तथैशाद्यप्रदक्षिणात्।
लोहं वैडूर्यसहितं चक्राङ्क चाभ्रकं तथा॥२३॥

षाष्टिकास्त्वीशदिग्भागे वायोस्स्थाने विनिक्षिपेत्।
पुष्यरागं हरीतं च गैरिकं शारिकं त्रपु॥२४॥

मसुरान् नैऋते स्थाने महानीलं च वङ्गेम्।
पाषाणामाक्षिकं चैव यवाः सागरिकास्तथा॥२५॥

आग्नेये स्फटिकं ताम्रं मनोगुप्तं तथैव च।
गोधूमाः शङ्खपुष्पाश्च मन्त्रं साङ्गमुदिरयन्॥२६॥

मध्ये सर्वाणि तदनु सुधया लेपयेत् पुरा।
द्वाराद् भित्यन्तभूमिं तु सप्तधा विभजेद् गुरूः॥२७॥

ब्रह्मस्थानं मध्यमं स्याद्देवस्थानमनन्तरम्।
मानुषं च ततः पश्चात् पैशाचं समुदीरितम्॥२८॥

एकबेरे ब्रह्मशिलां ब्रह्मस्थाने तु निक्षिपेत्।
बहुबेरविधाने तु देवमानुषयोः पदे॥२९॥

श्रीभूम्योर्वैनतेयस्य पार्श्वयोर्मण्डपे पुरा।
द्वारमध्यं न संत्याज्यं न पार्श्वे न च पृष्ठतः॥३०॥

यतो हितार्थं सर्वेषां निर्गुणं षड्गुणात्मना।
अतो ब्रह्मसदादीषद्देवभागे स्थितिर्भवेत्॥३१॥

मोक्षादि फलसिद्धीनां प्राप्तये ह्यविचारतः।
भगवन्तं बिम्बरूपं स्थापयेदासने पुरा॥३२॥

बिम्बपीठशिलानां च कुर्यादेकत्ववत्थितिम्।
शिल्पी कुर्यात्ततः पूर्वं विमानस्योपरि स्थिते॥३३॥

शङ्कौ स्तूपीं प्रोतयित्वा कुर्यादेकत्ववत्स्थितिम्।
विमानस्थितदेवानां नयनोन्मीलनं तथा॥३४॥

एवं मूलादिबिम्बानां विमानादेश्च देशिकः।
नयनोन्मीलनादीनि कारयित्वा तु शिल्पिभिः॥३५॥

कर्मादीनां च बेराणां पीठसंयोजनं चरेत्।
वस्त्रं प्रसार्य तदनु तस्मिन् पद्मानि निक्षिपेत्॥३६॥

तस्योपरि पूनर्वस्त्र शालिभारं तदूर्ध्वतः।
तदर्धं तण्डुलं न्यस्य तस्मिन्नुपरि वै तिलम्॥३७॥

तस्मिन् पद्मं विलिख्याथ आस्तीर्य कुशसंहतिम्।
प्रसार्य नूतनं वस्त्रं तस्मिन् पीठं सपद्मकम्॥३८॥

अपद्मं वा विनिक्षिप्य विष्णोर्गायत्रया ततः।
रत्न्यासादिकं कृत्वा तेन मन्त्रेण वै गुरुः॥३९॥

आज्येनाष्टोत्तरशतं नृसूक्तेन च षोडश।
अन्नेन च ततो देवि प्रोक्ष्येत् पुण्यवारिणा॥४०॥

मनसा सुप्रतिष्ठेति पीठे देवं नियोजयेत्।
प्रतिष्ठासीति वै साम पठेयुश्च समन्ततः॥४१॥

दृढबन्धं शिल्पिवरः कुर्यात् तं तोषयेत् प्रभुः।
धनैर्भूषणवस्त्राद्यैर्विसृजेच्च ततो गुरूः॥४२॥

Appexdix IX

EXCERPTS FROM KRIYĀDHIKĀRA

(PRATIṢṬHĀ-MUHŪRTA-VICĀRA)

मासेषु फाल्गुने चैत्रे ज्येष्ठे वैशाखतिष्ययोः।
उत्तमं श्रावणे मध्यं कार्तिकाश्वयुजोरपि॥

अधमं भाद्रपादेपि तथाषाढे च मासि वै।
मार्गशीर्षञ्च माघञ्च वर्जयित्वा विचक्षणः॥

शेषेष्वपि च कर्तव्यं त्वरितेनेति मे मतिः।
शुक्लपक्षे तथा कृष्णे विभागे त्रयंशकं विना।

रेवतीरोहिणीतिष्यस्वातीश्रवणवासवाः।
चित्राश्विनीशतभिषक्पुनर्वस्वैन्दवाश्शुभाः॥

कृत्तिका नवमी शस्ता दुर्गायाः कार्तिकेपि च।
प्रतिष्ठा भास्वतश्शस्ता रवौ सिंहगते तथा।

फाल्गुनोत्तरफल्गुन्योः श्रीप्रतिष्ठा प्रशस्यते।
रौद्रं रुद्रप्रतिष्ठायां माघमासं च कथ्यते॥

श्रवणं चाश्चयुङ्मासे मत्स्यादिस्थापनाविधौ।
अनन्धकाणनक्षत्रे करणे च शुभोदये॥

त्रिजन्मसु प्रतिष्ठा स्याद्यजमानस्य भूपतेः।
काव्यजीवज्ञवारांशहोराद्रेकाणकांस्तथा॥

बधुवारांशकादींस्तु प्रशंसन्ति मनीषिणः।
षष्ट्यष्टमीपर्वरिक्तानन्दादिषु तिथिष्वपि॥

चरेषु करणेष्वेव शुभयोगेष्वविष्टिषु।
तिथिवारर्क्षयोगादिदोषैरपि विवर्जिते॥

रव्यादिषु शुभस्थेषु तथा रिक्तेष्टमे ग्रहैः।
त्रिषडायगतैः पापै शुभैः केन्द्रत्रिकोणगैः॥

शुभैर्युक्तैथवा दृष्टे कामशुक्रविवर्जिते।
प्रतिष्ठां देवदेवस्य कुर्यात्पूर्वाङ्ग एव वै॥

Appexdix X

EXCERPTS FROM ŚRI-PRAŚNA-SAṀHITĀ

(PRATIṢTHA-VIDHI)

अथ प्रतिष्ठां वक्ष्यामि बिम्बरूपस्य मे विभोः।
मानुषाणामिष्टसिद्ध्यै भूयः सन्निध्यकारणात्॥१॥

लोहरत्नजसंभूता सर्वलक्षणलक्षिताम्।
भूमावर्चां लौहजन्यां शैलीं दार्वादिनिर्मिताम्॥२॥

निर्माय चालये मर्त्यैगृहे वा द्रव्यसंचितैः॥४॥

कृत्वा प्रतिष्ठां पूजादिकर्म कुर्वन्ति साधवः।
फलं च तेषामतुलं भवतीति त्वयोदितम्॥५॥

कदाचिदपि देवानामदृष्टिविषयं गतः।
यदि स्यात् पूजने तेषामर्चारूपस्य ते मतिः॥६॥

लोहादिद्रव्यजातौ वा प्रत्यक्षेणाथवा भवान्।
तेषु लोकेषु बहुधा स्थास्यते किं जगन्मय॥७॥

परमेष्ठयादयो देवा भूमावालयनिर्मितम्।
मद्रूपं च समालोच्य शास्त्रं सारतमं त्विदम्॥८॥

मर्त्यानां निधिवत्प्राप्तममर्त्यानां च दुर्लभम्।
चिन्तामभिसमाविष्टाः स्वयं प्राप्तुं दिवौकसः॥९॥

निश्चित्य मनसा श्वेतं द्वीपमासाद्य निर्ममाः।
तप्स्यन्ति तप उग्रं ते सहस्त्रं मानुषं समाः॥१०॥

तेषां मनोरथं ज्ञात्वा प्रकारादिसमन्वितम्।
दर्शयिष्याम्यात्मरूपं विमानान्तर्गतं शुभम्॥११।

शङ्खचक्रादिसहितमर्चारूपिणमव्ययम्।
स्तोष्यन्ति विविधैः स्तौत्रैर्जितंताद्यादिभी रमे॥१२॥

तेषां स्तुत्या च नत्या च प्रसन्नो भविताम्यहम्।
वदिष्यामि ब्रुवन्त्वद्य करीष्यामि च वां वचः॥१३॥

इति मद्वचनं श्रुत्वा ब्रह्माद्याः देवतास्तदा।
यदि प्रीतिस्तव विभो त्वदीयेषु जनार्दन॥१४॥

युष्मद्दत्तेषु लोकेषु मदीयेषु जगद्गुरो।
एवमेव विमानेन बिम्बरूपेण नित्यशः॥१५॥

स्थातव्यं त्वां वयं नित्यं पूजनीयं विशेषतः।
शास्त्रं चाप्युपदेष्टव्यं येन पूजादिकर्मसु॥१६॥

सावधाना भविष्याम इति संप्रार्थयिष्यते।
ततो भक्तजनाकम्पी ब्रह्मादीन् बोधयाम्यहम्॥१७॥

युष्माकं प्रीतयेहं वै बिम्बरूपं समास्थितः।
तत्र तत्र वसिष्यामि पूजयिष्यन्तु नित्यशः॥१८॥

युष्माकमिष्टसिद्धिश्च दास्याम्यत्र न संशयः।
एतच्छास्त्रं विस्तरेण उपदेक्ष्यामि वै विधेः॥१९॥

उपदेक्ष्यति युष्माकं शास्त्रमेतच्चतुर्मुखः।
इति तानुच्यमानोहमात्मानं सविमानकम्॥२०॥

दर्शयिष्यामि बहुधा तं नमस्कृत्य विस्मिताः।
यस्य यस्य विमानं यद्रोचते त्विष्टसिद्धिदम्॥२१॥

ब्रह्मादयो देववराः सर्ववादित्रनिःस्वनैः।
स्वं स्वं लोकं च नेष्यन्ति पूजयिष्यन्ति नित्यशः॥२२॥

एतच्छास्त्रं ब्रह्मणे च तदन्येभ्योपि वै रमे।
उपदेक्ष्यामि विस्तारात् संग्रेहण च सर्वतः॥२३॥

प्रसरिष्यन्ति सत्यादावेतच्छास्त्रोक्तवर्त्मना।
पूजयिष्यन्ति सत्यादावप्राकृतसमुद्भवम्॥२४॥

देवं मां तेषु लोकेषु स्वयंव्यक्तं तथापरम्।
दिव्यमित्यन्यलोकेषु सैद्धमार्षं तु मानुषम्॥२५॥

अतस्तेषां प्रतिष्ठापि न कर्तव्या कदाचन।
भूमौ तु प्राकृतैर्द्रव्यैर्निर्मितस्य च शिल्पिभिः॥२६॥

द्रव्यशुद्ध्यै क्षेत्रशुद्ध्यै मत्सांनिध्याय वै गुरुः।
नियमेन प्रतिष्ठां वै कर्तव्यां तां ब्रवीमि ते॥२७॥

भूपरिग्रहकाले च दीक्षाध्याये च लक्षणम्।
भट्टाचार्यस्य यत्प्रोक्तं तल्लक्षणगुणैर्युतः॥२८॥

पूर्वोक्तदीक्षया युक्तः कर्षणादिषु चेद् वृतः।
तमेव च प्रतिष्ठायामाचार्यं प्रर्थयेत् प्रभुः॥२९॥

विनाचार्यस्य वरणादालयं निर्मितं तु वा।
आदौ वृतोप्यशक्तो वा तत्पुत्रं तद्गुणैर्युतम्॥३०॥

सोपि मन्त्रादिहीनश्चेदन्यं सर्वगुणैर्युतम्।
मयोक्तगोत्रिणं शुद्ध दीक्षितं सर्वसंमतम्॥३१॥

पाञ्चरात्रार्थतत्वज्ञं मन्त्रतन्त्रविशारदम्।
यजमानः स्वयं गत्वा देशिकेन्द्रस्य वै गृहम्॥३२॥

नमस्कृत्य पुरा तस्य नालिकेरफलं करे।
दत्वा संप्रार्थयेद् देवि वासुदेवस्य वै विभोः॥३३।

सालयस्य प्रतिष्ठां वै गुरौ त्वं कर्तुमर्हसि।
इत्थं संप्रार्थितो विद्वानाचार्यः कालवित्तमः॥३४॥

कार्तान्तिकेन सहितः कालं सम्यग्विशोधयेत्।
नभोमासं मार्गशीर्षं माघमासं च वर्जयेत्॥३५॥

मासेष्वन्येषु शुक्लस्य पक्षस्य प्रथमातिथौ।
द्वितीयायां तृतीयायां पञ्चम्यां सप्तमतिथौ॥३६॥

एकादशीदशम्योश्च द्वादशी च त्रयोदशी।
पूर्णिमा चासु तिथिषु कृष्णपक्षस्य पञ्चमी॥३७॥

यावद्भवेत्तावदेव कर्तव्यं न ततः परम्।
वारेषु शुभदः प्रोक्तः सोमः सौम्यस्तथा गुरुः॥३८॥

शुक्रश्व वाराधिपतयो नक्षत्राणि शृणुष्व मे।
अश्विनी रोहिणीपुष्यपुनर्वस्वथ चोत्तरम्॥३९॥

उत्तरद्वितयं हस्तश्रवणं रेवती तथा।
एतेषु च व्यतीपातसंक्रान्तिग्रहणं तथा॥४०॥

मलमासैं शुक्रमौढ्यं गुरोर्मौढ्यं तथैव च।
एतद्युक्तास्तिथीर्मुक्त्वा लग्ने तु वृषभे तथा॥४१॥

मिथुने सिंहलग्ने वा मीने धनुषि वा रमे।
तुलायां वा लग्नथो बलवानथवा गुरुः॥४२॥

शुक्रे वा वीक्षते लग्नमेकादशगतौ तु वा।
यल्लग्नं यजमानस्य धाम्नो देवस्य वृद्धिदम्॥४३॥

तस्मिन् प्रतिष्ठां निश्चित्य ततो दशदिनात्पुरा।
शुभे मुहूर्ते देवस्य धाम गत्वा गुरूत्तमः॥४४॥

अन्तर्वापि बहिर्वापि निर्बाधं यत्र वै स्थलम्।
तत्रैतेनैव मानेन मण्डपादीश्च कल्पयेत्॥४५॥

मानं मानान्तरं मुष्टिर्मात्रा देहस्तथैव च।
एतेषां लक्षणमपि श्रुणुष्व कमलेक्षणे॥४६॥

वातायनपथं प्राप्य ये गच्छन्ति रवेः कराः।
तेषु सूक्ष्मतरा यान्ति रेणवः परमाणवः॥४७॥

तेष्टौ लेश्ह्वयस्तेष्टावणुरित्यभिधीयते।
तेष्टौ महांस्तदष्टौ च यव इत्यभिधीयते॥४८॥

यवाष्टकैरङ्गुलं स्यात् सप्तभिः स तु मध्यमः।
यवाषट्कैरङ्गुलं तु कनीयस्यङ्गुलं भवेत्॥४९॥

एतन्मानाङ्गुलं नाम शिल्पिभिः समुदाहृतम्।
तिर्यग्यवाष्टकैर्वा ऋजुभिर्वा त्रिभिर्यवैः॥५०॥

विन्यसेद्यत्र मानेन तन्मानान्तमीरितम्।
एतेन वेदिकापीठरथादीनां च कल्पनम्॥५१॥

मुष्ट्यङ्गुलं गुरोर्मुष्टि चतुर्धा विभजेत् क्रमात्।
होमाङ्गनि स्त्रुवादीनि कुण्डं मुष्ट्यङ्गुलैर्भवेत्॥५२॥

गुरोर्दक्षिणहस्तस्य मध्यमाङ्गुलमुदाहृतम्॥५३॥

यागोपकरणानां च तैर्मात्राङ्गुलभिर्भवेत्।
अर्चां विभज्य नवधा वेष्वेकं द्वादश क्रमात्॥५४॥

विभज्य द्वादशस्वेकं मानाङ्गुलमुदाहृतम्।
प्रसादं गोपुरं सर्वं बिम्बानि विवधान्यपि॥५५॥

कुर्यादेतेनाङ्गुलेन पूर्वोक्तानि च शिल्पवित्।
चतुर्विंशति हस्तैर्वा दशभिश्चाष्टभिस्तु वा॥५६॥

करैः षोडशिभिर्वापि भवेद् द्वादशभिस्तु वा।
विस्तारायामसदृशं चतुर्द्वारसमन्वितम्॥५७॥

मेखलैका मण्डपस्य भूमेस्तालोच्छ्रिता मता।
वेदीनामपि कुण्डानां स्तम्भैर्बाधा न चेत्तथा॥५८॥

स्तम्भान् प्रकल्पयेत् तस्मिन् मण्डपे देशिकोत्तमः।
समभूमिं पुरा कृत्वा ततो वेदीः प्रकल्पयेत्॥५९॥

प्रतिष्ठाकर्म देवस्य विमानस्यैकदा यदि।
तदा वेदिद्वयं कार्यं घटस्थापनकर्मणि॥६०॥

उच्छ्रायमेकहस्तं स्याच्चतुरश्रं चतुर्भुजम्।
आदावन्ते मेखलेकं परितः कुण्डशोभितम्॥६१॥

शयनायोत्तरे तस्य दृङ्मोक्षणविधौ तथा।
ऐशान्ये पालिकायाश्चव बालस्थापनाकर्मणि॥६२॥

चक्राब्जमण्डलविधौ नयनोन्मीलनस्य च।
वेदिः प्रकल्पयेद्विद्वान् तद्वेद्यास्तु पार्श्वयोः॥६३॥

प्रवेशनिर्गमार्थाय विसृजेद् वीथिकाः क्रमात्।
दीर्घह्रासं तु वेदीनां तत्तत्कर्मानुसारतः॥६४॥

मण्डपस्यानुरोधाद्वा द्रव्यस्य च तथा भवेत्।
वेदिसृष्टीर्मया प्रोक्ता कुण्डकल्पनमुच्यते॥६५॥

कुण्डसंख्यां कार्यविधि कुण्डभेदं च कल्पते॥६६॥

त्रिकोणं च चतुष्कोणं पञ्चकोणं षडश्रकम्।
सप्ताष्टमकोणं च दशैकादशकोणकम्॥६७॥

द्वादशाश्रं चापकोणं वृत्तं पद्मं च पद्मजे।
योनिकुण्डमिति प्रोक्तं चतुर्दश गुरूत्तमैः॥६८॥

प्रयोजनं तु वक्ष्यामि शृणुष्व कमलेक्षणे।
सर्वाभ्युदयकर्माणि चतुष्कोणे समाचरेत्॥६९॥

पौष्टिकं पद्मकुण्डे तु शान्तिं वृत्ते सुखावहम्।
पञ्चकोणे यक्षकन्यावशं कर्म षडश्रके॥७०॥

स्तम्भनार्थाय सप्ताश्रे मोहनं कर्म कारयेत्।
अष्टाश्रे मारणं कर्म विद्वेषं नवकोणके॥७१॥

दशाश्रकुण्डे वस्वादि पितृणां तोषणाय वै।
एकादशाश्रे ब्रह्मादिदेवतायत्तसाधने॥७२॥

द्वादशाश्रे हरिं द्रष्टुं यौनौ कन्याप्तिहेतवे।
त्रिकोणे मारणं कर्म चापे तूच्चाटनं भवेत्॥७३॥

निधिप्राप्तिस्त्रिकोणे वा चापे शत्रुजयं भवेत्।
एषां सृष्टिं प्रवक्ष्यामि प्रत्येकं कमलालये॥७४॥

मन्वग्न्यङ्गुलिसंख्येन कोणेषु चतुर्ष क्रमात्।
सूत्रेण लाञ्छयेन्मध्यात् कोणात्कोणं भुजैककम्॥७५॥

एवं चेच्चतुरश्रं स्यात् त्रिकोणस्य वदामि ते।
द्वात्रिंशदङ्गुलीसंख्या सूत्रं कोणेषु लाञ्छयेत्॥७७॥

पञ्चाश्रे नाभिदेशाच्च चतुर्यवसमन्वितम्।
षोडशङ्गुलिसंख्याकं सूत्रं कोणेषु पातयेत्॥७७॥

कोणात्कोणं सप्तिसूर्यसूत्रविन्यासमाचरेत्।
षडश्रे मध्यशङ्कोश्च कोणात्कोणं च षोडश॥७८॥

नाभिशङ्कोश्च सप्ताश्रे षड्यवैः पक्षसंख्यकाः
कोणात्कोणं चाङ्गुलयोर्भवेयुर्मनुसंख्यकाः॥७९॥

अष्टाश्रे षोडश प्रोक्ताश्चतुर्यवसमन्वितः।
अङ्गुलैस्तु द्वादशभिरष्टाश्रं परिकल्पयेत्॥८०॥

नवाश्रे नाभिशङ्कोश्च चतुर्भिर्यवभिर्युतान्।
पक्षसंख्याङ्गुलान् कोणे षड्यवैर्दश चाङ्गुलान्॥८१॥

कोणात्कोणं लाञ्छयीत दशाश्रं शृणु वल्लभे।
मध्यात्कोणेषु विन्यासश्चतुर्भिर्यवसंयुतैः॥८२॥

पक्षेण च ततः कोणादन्यत् कोणं तु पञ्चकैः।
यवैः समेताङ्गुलिभिः नवभिः कल्पयेद् गुरुः॥८३॥

एकादशाश्रे मध्यात्तु चतुर्यवसमन्वितान्।
पक्षाङ्गुलीन् कोणदेशे विन्यसेद् षड्यवैर्युतान्॥८४॥

अष्टावङ्गुलयः कोणादन्यत्कोणस्य ईरिताः।
द्वादशाश्रे मध्यशङ्कोः कोणं पञ्चदशाङ्गुलम्॥८५॥

चतुर्यवेन संयुक्तं प्रत्यश्रं चाष्टसंख्यया।
अङ्गुल्या लाञ्छयेद्विद्वान्योनिकुण्डे तु मध्यमम्॥८६॥

अष्टादशाङ्गुलं सूत्रं नाभिदेशाद् दशाङ्गुलम्।
वेष्टयेत् पार्श्वयोस्तस्य चत्वारिंशत्तथाष्टकम्॥८७॥

विन्यसेदङ्गुलिं चक्रे कुण्डे मध्याच्चतुर्दश।
एकं च वेष्टयेत् सूत्रं तदेव स्यात्तु पद्मकम्॥८८॥

चापकुण्डे शङ्कुदशात् पार्श्वयोरुभयोरपि।
अष्टादशाङ्गुलेर्न्यासः सैव ज्या तु धनू रमे॥८९॥

तत्स्थानाद् वेष्टिते सूत्रे दक्षिणादुत्तरावधि।
धनुष्कुण्डं भवेद्देवि शास्त्रज्ञैरुच्यते बुधैः॥९०॥

यस्य कार्यस्य यत्कुण्डं तस्मिन् कुर्याच्च तत्क्रियाम्।
तस्माच्छास्त्रं पुरालोच्य तत्तत्कुण्डं प्रकल्पयेत्॥९१॥

सामान्यमित्थं कुण्डानां कल्पनं तु मयोदितम्।
चतुष्कोणादिकुण्डानां चतुर्णां देवधामसु॥९२॥

निर्माणेषु प्रतिष्ठायामुत्सवे नित्यपूजने।

शान्तिहोमेषु सर्वत्र प्रायश्चित्तादिकर्मसु॥९३॥

कुण्डानि शास्त्रतः कृत्वा तेषु होमं समाचरेत्।
अकृत्वा हूयते यत्र वह्निस्तत्र न तृप्यति॥९४॥

अतृप्ते मयि वह्निस्थे स्वार्थसिद्धिः कथं भवेत्।

कुण्डान्यतो विधायैवं जुहुयादेषु कर्मसु॥९५॥

कुण्डानां परिधिं कुर्यात् षण्णवत्यङ्गुलायतम्॥९६॥

तदर्धं पादमथवा चतुरङ्गुलमेव वा।
खातयेत् परितस्तिस्त्रे मेखलाः परिकीर्तिताः॥९७॥

तालोन्नता स्यात् प्रथमा द्वितीयाष्टाङ्गुला भवेत्।
चतुरङ्गुला तृतीया स्यादेकैकायाश्च विस्तृतिः॥९८॥

चतुरङ्गुलसंयुक्ता तत्तत्कुण्डानुसारतः।
मेखलापि च कल्प्या स्यात्कुण्डान्तर्मध्यमे स्थले॥९९॥

द्वादशच्छदसंयुक्तं पद्मं कल्प्यं सकर्णिकम्।
पद्मकुण्डे न पद्मं स्यात् योनिकुण्डे न योनिमत्॥१००॥

यत्र स्थित्वर्त्विजो होमं कुर्वन्ति कमलालये।
तत्र योनिं प्रकुर्वीत मेखलोपरि सर्पवत्॥१०१॥

अधश्च द्वयङ्गुलं नाकं मध्ये तु चतुरङ्गुलम्।
ऊर्ध्वे षडङ्गुलं प्रोक्तं सर्पस्य फणवद्भवेत्॥१०२॥

कुम्भवेद्यास्तु परितश्चतुस्तालाद् बहि रमे।
प्रादेशे चतुरश्रं स्यात् कुण्डं चापं तु दक्षिणे॥१०३॥

प्रतीच्यां वृत्तकुण्डं तु कमलं वा त्रिकोणकम्।
कौबेर्यां कल्पयेद्विद्वान् चापस्य ज्यां तु पश्चिमे॥१०४॥

स्रुक्स्रुवौ लोहमुख्येन यज्ञवृक्षेण वा गुरुः।
स्वबाहुमानदण्डेन साङ्गुलेन च वै स्रुचः॥१०५॥

घनं विस्तारसंदृशं षड्गुलमुदिरितम्।
काष्ठमादाय तत्काष्ठमेकं भागं नवाङ्गुलम्॥१०६॥

मुखं क्रोडस्य सद्दशमेकार्धाङ्गुलमायतम्।
गलमेकं तदर्धं च नहनं वृत्तमायतम्॥१०७॥

ततश्चान्यं गलं चापि मुखं च परितक्ष्येत्।
षड्गुलं यज्ञपात्रं विस्तारायामयोः समम्॥१०८॥

घनं च तस्य मध्ये तु त्र्यङ्गुलं सुषिरं भवेत्।
द्वादशच्छदसंयुक्त पद्मं कल्प्यं सकर्णिकम्॥१०९॥

उन्नतेषु ततः किंचित् षोडशारं सनेमिकम्।
नेमिरेकाङ्गुलं तस्य तून्नतौ त्वङ्गुलं भवेत्॥११०॥

चतुष्कोणं यदि भवेत् शङ्खान् कोणेषु लाञ्छयेत्।
मेखलाः परितस्तिस्त्रः प्रत्येकं यवमानकाः॥१११॥

पृष्ठदशं कूर्मवद्वा पद्माकारस्तु वा भवेत्।
कुर्यादाज्यप्रणालं तु मन्युनाङ्गुलं मुखे॥११२॥

ततो द्व्यंशो दीर्घदण्डः पद्मस्यास्याद्यथोद्भवः।
सार्धाच्च द्व्यङ्गुलघनादवशिष्टं तु तक्षयेत्॥११३॥

स दण्डश्चतुरश्रो वा वर्तुलो वा भवेद्रमे।
वलित्रयसमोपेतः अन्ते पद्मं प्रकल्पयेत्॥११४॥

हस्तमात्रं दीर्घकाष्ठं द्व्यङ्गुलं घनविस्तृनि।
तस्याग्रे द्व्यङ्गुलं कुर्यात् वर्तुलं तस्य मध्यतः॥११५॥

निम्नमर्धाङ्गुलं युग्मं तयोर्मध्ये यवाकृतिः।
भित्तिः स्यात् परितो भद्रे ह्यर्धाङ्गुलसमन्विता॥११६॥

हरिणीखुरवत्तत्स्यादाज्यस्थानं सुमध्यमे।
विस्तारस्य त्रिभागेन ग्रीवाकल्पनमिष्यते॥११७॥

मूले चोभयतः कुर्यात् स्वस्तिकं द्वयङ्गुलायतम्।
अवशिष्टं वर्तुलं स्यात् दण्डं चित्रविराजितम्॥११८॥

Vidyalankara, Sastra-Chudamini, Sangita-Kalaratna, Professor Saligrama Krishna Ramachandra Rao, is a well-known scholar who combines traditional learning with modern research. Well versed in Sanskrit, Pali, Ardhmagadhi and several modern Indian languages and acquainted with Tibetan and some European languages, he has written extensively on Vedanta, Buddhism, Janism, Indian Culture, Art and Literature.

In his professional career, however, he was a Professor of Psychology. He has headed the Department of Clinical Psychology in the National Institute of Mental Health and Neuroscience's, Bangalore and the Department of Indian Culture in the Collision College Study Center of the University of the Pacific (U.S.A.) He was the senior associate of National Institute of Advanced Studies (Indian Institute of Science), Bangalore, and Guest Faculty, Indian Institute of Management, Bangalore and member of the Governing Council of TTD (SVCL Research Center), Tirupati. He has been member of Karnataka State Lalitha Kala Academy and Sangita Nritya Academy and Sangita Nritya Academy; he has served on the Agama Board (Govt. of Karnataka). He is President of Silpa-Kala Pratisthana. The Govt. of Karnataka has honored him with the 1986 Rajyotsava Award. He has received awards from Lalita-Kala Academy and Sangita Nritya Academy. He has been Awarded the Veda-Sanman for the year 2000 by the Govt. of India (Ministry of HRD, Sandipani Mahavidhyalaya, Ujjain). He has written more than Sixty Books in Kannada, a Play in Sanskrit, and a Pali Commentary on a Buddhist classic. One of his books on Iconography in Kannada has won the State Sahitya Academy Award, as also another of his Book on the Tirupati Temple.

Rs300./

Published by
Sri Satguru Publications,
Indological and Oriental Publishers
A Division of
Indian Books Centre
24/4, Shakti Nagar,
Near Dena Bank
Delhi-110007

